ASTAPUSPIKA

CHECKED 1

NILKAMAL BHATTACHARYA, M A

अष्टपुष्पिका ।

श्रीनीलकमलभट्टाचार्य–एम. ए.-

षड्लिता ।

PUBLISHED BY
NANDKISHORE & BROS.
BENARES.

ASTAPUSPIKA

OR

A SANSKRIT ANTHOLOGY.

(WITH NOTES)

BY

NILKAMAL BHATTACHARYA, M A

Professor of Sanskrit, Central Hindu College,

BENARES HINDU UNIVERSITY

अष्टपुष्पिका ।

बनारसहिन्दुविश्वविद्यालयान्तर्गत-सेन्ट्रल हिन्दु कालेज्-

संस्कृताध्यापक-

श्रीनीलकमलभट्टाचार्य-एम. ए.

बङ्गलिपा ।

SECOND EDITION.

BENARES.

1927.

[PRICE RE. 1/12.

Copyright reserved by the Author.

PUBLISHED BY
NANDKISHORE & BROS.
CHOWK, BENARES

PRINTED :
he whole of the text and pages 1—51 of the Notes at the
Tara Printing Works, Benares, and the rest of the book
at the MAHAMANDAL PRESS BENARES.

- full of -

PREFACE TO THE FIRST EDITION

The object of the present compilation is to provide a suitable reading book for Intermediate students The pieces have been drawn from standard works, representing a variety of styles, as also of scenes and sentiments agreeable to the taste and capacity of the young readers they are intended for

* * * * *

The title of the work is षट्पुष्पिका—a term with a classical sanction for its use, the word having occurred once in the Kādambarī and twice in the Harshacharita The eight flowers that form the collection (both numerically and specifically) are enumerated as लज्जा, दया, द्वेष, अरति, भक्ति and भगवद्विषया, with two others (which are क्षान्ति and अशोक according to one authority and धैर्य and चम्पक according to another). The adoption is somewhat unwarranted, पुष्प ordinarily, not enjoying the same latitude of figurative use as its English equivalent 'flower'

The expression सत्यं शिवं सुन्दरम्, which appears at the opening page of the book requires a word of explanation It claims no upanishadic originality like तत्त्व मसि नम (ब्रह्म), but is a literal translation, ascribed to the founder of the present day eclectic Brāhma sect, after the upanishadic model, of the English phrase 'The true, the good and the beautiful' I have chosen it for the motto of my work as summing up in a nutshell the essentials of belles lettres

ts of the compilation, the first piece—
Raghu s ta[illegible]ion—has a peculiar interest for the historian
The conception, however, is not an original one, the poet
having undubitably had in view the Pandavas fashions of the
Mahabharata With all deference to what historians would
say on the point, my personal conviction (for which I reserve
my evidence) about the extent of India as pictured in the
piece takes me far beyond to Persia I may remark, en
passant, that the term [illegible], about the precise application
of which there is so much contention, applies in the context
to the Persians

* * * * *

The next piece—Rama's return to Ayodhya in an
aerial car—is an original conception, the poet having
borrowed the scene from the Ramayana The piece gives
an inkling to the scientific achievements of our ancestors

The third—Parvati's penance—sets forth an ideal of
unflinching devotion—the sine qua non of all true success
in life

The appreciation of the fourth—the fourth act of
the Śakuntala—finds expression in the couplet—[illegible]
[illegible] (?) । [illegible] ॥
The Prakrta portions, including the two गाथाs appear
in their Samskrit forms in this piece

The fifth—a touching scene of war—is an abridgment
of Acts IV and V of the Venisamhara compressed into one
Here, too the Prakrta portions are presented in their
Samskrit forms

The sixth—the story of Manchu—is full of dramatic interest literary beauty and practical instruction

The seventh—Śakuntala's advice to Chandrapida—is a mast-rpiece of prose The piece has been taken un mutilated, with eliminations of only two small points that seemed to jar on the sense of decency

The eighth—the story of Mahāśveta—is rich in scenes of romantic interest * * *

* * * * * * *

The Author

PREFACE TO THE SECOND EDITION

The present edition is a reprint of the first except that one piece the मोक्षविश्रान्ति which was found a little unsuitable, has been replaced by another—विष्णुचरित—from the same work (the Dasakumaracarita) and that the vocabulary, which cost more labour than it was of use to the student, has been incorporated with the notes, besides some minor changes here and there, in the shape, either of variants or eliminations The महाश्वेताख्यान, it should be mentioned, has been further abridged in the light of the student's capacities and the Sanskrit renderings of the two Prakrit verses occurring in the वज्रालग्न have been recast into a closer form to the original

Benares
July, 1927

The Author

अनुक्रमणिका ।

विषयः		पत्राङ्कः
१—रघु-दिग्विजयः	(रघुवंशम्)	१
२—रामचन्द्र-धनुरारोपवर्णनम्	(,,)	१०
३—पार्वती-तपश्चर्या	(कुमारसम्भवम्)	२५
४—प्रस्थानकौतुकम्	(शाकुन्तलम्)	५१
५—दुर्योधननिर्वेदः	(वेणीसंहारम्)	७७
६—विप्रचरितम्	(दशकुमारचरितम्)	८७
७—शुकनासोपदेशः	(कादम्बरी)	१०४
८—महाश्वेताश्रमवर्णनम्	(,,)	११२

अष्टपुष्पिका ।

"सत्यं शिवं सुन्दरम् ।"

रघुदिग्विजयः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सचिवेव हुताशनः ॥ १ ॥
दिलीपानन्तरं राज्ये तं निशाम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
पुरुहूतध्वजस्येव तस्योन्नयनपंकयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३ ॥
समेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम् ॥ ४ ॥
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५ ॥
परिकल्पितसान्निध्या काले काले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ॥ ७ ॥
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आदत्ते नाश्रियो रक्षन् नभस्यानिव दक्षिणः ॥ ८ ॥
मन्दोत्कण्ठाः फलास्तेन गुणाधिक्यवता गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥
नयविद्भिर्नये तस्मिन् सद्वृत्तयोपदर्शितम् ।
पूर्वं पक्षावलम्बित्वमाश्रयदुस्तरः ॥ १० ॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
भवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥
लक्ष्यप्रशमनस्वस्थमधैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ॥ १४ ॥
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः ॥ १५ ॥
धार्मिके संजहारेन्द्रो धनुर्जैत्रं रघुर्दृढा ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥
पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विजृम्भयामास न पुनः प्राप तद्भियम् ॥ १७ ॥

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८ ॥
हंसश्रेणिषु तारासु कुमुदत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९ ॥
इक्ष्वाकुतनयादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥
प्रससादोदयादभ्रः कुम्भयोनेर्महौजसः ।
घोरमिभवाराङ्कि क्षुभे द्विषतां मनः ॥ २१ ॥
मदोदग्राः करेणवः सरितां कूलमुद्रजाः ।
लीलाखेलमनुप्रापुर्महेन्द्रास्त्रस्य विक्रमम् ॥ २२ ॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहृताः ।
असूययेव तन्नागाः संलध्वेव प्रसुस्रुवुः ॥ २३ ॥
सरितः कुर्वती गाधाः पयश्चाश्यानकर्दमान् ।
यानायै नोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥
तस्मै सम्यग् हुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्यजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥
अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहितानिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ॥ २९ ॥
प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३० ॥
मरुपृष्ठान्युदम्भांसि नाव्या सुप्तरा नदीः ।
विषमानि प्रकाशानि शक्तिमंत्राघकार स ॥ ३१ ॥
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२ ॥
त्याजितै. फलमुत्खातैर्मग्नैश्च बहुधा नृपैः ।
तस्यासीदध्वगो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेष आक्रामंस्तांस्तान्जनपदान्यथौ ।
आप तालीवनश्यामसुपकण्ठं महोदधेः ॥ ३४ ॥
अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा सरक्षितः सुह्मैर्वृत्तिमाधित्य वैतसीम् ॥ ३५ ॥
बङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥ ३६ ॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः सवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥
स वीर्यशुल्कां कपिशां सैन्यैर्वङ्गद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गर्वोत्पवेदिनः ॥ ३९ ॥

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥
द्विषां विषह्य काकुत्स्थस्तस्य नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तस्य रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाधृष्यजयो ययौ ॥ ४४ ॥
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्धान्तहरिता मलयाद्रेरुपत्यकाः ॥ ४६ ॥
ससञ्जुरुच्यश्रुणानामेलानामुपतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नाशक्नुवत् करिणां प्रैवं त्रिपदीच्छेदिनामपि ॥ ४८ ॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पार्श्वाः प्रतापं न विषेहिरे ॥ ४९ ॥
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ५० ॥

स निर्विश्य यथाकामं तरेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्या शैलौ मलयदुर्दुरौ ॥ ५१ ॥
असह्यविक्रम सह्यं दूरान्मुक्तमृदन्यता ।
नितम्बमिव मेदिन्याः स्खलांशुकमलङ्घयत् ॥ ५२ ॥
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्रोत्सारितोऽप्यासीत् सह्यलग्न इनार्णवः ॥ ५३ ॥
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥
मुरलामार्दवोद्भूतमगमत्कैतकं रजः ।
तद्योधवारणानामयत्नपटवासताम् ॥ ५५ ॥
अभ्यभूयत वाहानां चरता गात्रशिञ्जितैः ।
घर्मभिः पवनोद्भूतराजतालीवनध्वनिः ॥ ५६ ॥
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ५७ ॥
अथकाशं किलोद्वाह्यग्रामाद्याभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन स्वयं करम् ॥ ५८ ॥
मल्लेभदन्तोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥

संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥
मल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥
अपनीतशिरस्त्राणाः शंसास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षामण्डपभूमिषु ॥ ६५ ॥
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
हरैरुष्ट्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥ ६६ ॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दधुर्बर्हाजिनः स्कन्धैस्सप्तकुद्मदेसरान् ॥ ६७ ॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥
काम्बोजा. समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरुत्तोदैः साधंमानताः ॥ ६९ ॥
तेषां सदश्वमूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशु शश्वन्नोत्सेका कोशलेश्वरम् ॥ ७० ॥
ततो गौरीगुरुं शैलमारोहाश्वसाधनः ।
घर्षयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
शशंस तुल्यसत्त्वाना सैन्यघोषेऽप्यसम्भ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२ ॥

मूलेषु मर्मरीमूला· घोचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥
विश्रश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
द्रुपदो पासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥
सरलासक्तमाबद्धप्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥
तस्योत्तृष्टनिनादेषु कण्ठरज्जुलतत्रुचः ।
गजवर्ष्म किरातेभ्यः शशसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यरघोर्घोरं पार्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शरैकसंघसङ्घट्टान् स कृत्वा विरतोत्सवान् ।
जयोद्दाहरणं घाह्नो गोपयामास किन्नरान् ॥ ७८ ॥
परस्परेण विश्रान्तरेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९ ॥
तत्रादोभ्य यशोराशिं निवेश्यारुरोह सः ।
पौलस्त्यतुलितस्याद्रेरुपधानं इव ह्रियम् ॥ ८० ॥
चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तप्तजाम्बूनदां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथचर्मरजोऽप्यस्य क्व घ्नद्ध पताकिनीम् ॥ ८२ ॥
तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरत्यानुपकरोध यैः ॥ ८३ ॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेणच्छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्नाशां द्युसद्मस्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥
सन्धान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥
ते रेवाध्वनकुलिशाभपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्कुलीयु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

रामचन्द्रवंनप्रत्यावर्तनम् ।

अथात्मनः शब्दगुण गुणज्ञः
पद् विमानेन विगाह्यमानः ।
। रत्नाकर धौदय मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥ १ ॥
यैदेहि पश्यामलयाद्धिभक्तं
मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नम्
आकाशमाविष्कृतचारुतारम् ॥ २ ॥
गुणैर्यियक्षोः कपिसैन्य मध्ये
रसातल सक्षमिते तुरङ्गे ।
तदर्थमुर्वीमवदार्य्यद्भि.
पूर्वैः किलाय परिवर्धितो नः ॥ ३ ॥
गर्भं दधत्यर्कमरीचयोऽस्माद्
विवृद्धिमत्राप्नुवते धरूनि ।
अयिन्धनं वह्निमसौ निमर्ति
ब्रह्मादन ज्योतिरजन्यनेन ॥ ४ ॥
ता तामवस्थां प्रतिपद्यमान
स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयम्
ईदृक्तया रूपमियत्तया वा ॥ ५ ॥

नाभिप्रबुद्धाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः
संहृत्य लोकान्पुरुषोऽधिशेते ॥ ६ ॥
पक्ष्मच्छिदा गोत्रभिदाऽप्यगन्धा-
शरण्यमेनं शतधो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो
घर्मोत्तरं मध्यममाश्रयन्ते ॥ ७ ॥
रसातलादादिभवेन पुंसा
भुवः प्रयुक्तोद्वहनक्रियायाः ।
अस्याब्जमग्नः प्रलयप्रबुद्धं
मुहुर्वपुर्घूर्णनं बभूव ॥ ८ ॥
मुखार्पणेषु प्रकृतिप्रगल्भाः
स्वयं तरङ्गाधरदानदक्षाः ।
अनन्यसामान्यफलप्रवृत्तिः
पितृत्यसौ पाययते च सिन्धूः ॥ ९ ॥
ससत्त्वमादाय नदीमुखाम्भः
सम्मीलयन्तो विवृताननत्वात् ।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रध्वं वितन्वन्ति जलप्रवाहान् ॥ १० ॥
मातङ्गनक्रैः सहसोत्पतद्भि-
र्भिन्धान्द्विधा पश्य समुद्रफेनान् ।

कपोलसंसर्पितया प पर्पां
भजन्ति पर्णत्वणचामरत्वम् ॥ ११ ॥
पेलानिलाय प्रहृता भुजङ्गा
महोर्मिविस्फूर्जथुनिर्विशेषाः ।
सूर्यांशुसम्पर्कसमृद्धरागै-
र्व्यज्यन्त एते मलिमि फणस्थै ॥ १२ ॥
तवाधरस्पर्धिषु विद्रुमेषु
पर्यस्तमेतत्सहसोर्मिवेगात् ।
ऊर्ध्वांकुरमोतमुत क्वचित्
फलेशादपनामनि शस्त्रयूथम् ॥ १३ ॥
प्रवृत्तमात्रेण पयांसि पातुम्
आवर्तवेगाद् भ्रमता घनेन ।
आभाति भूयिष्ठमय समुद्र
भ्रमध्यमानो गिरिणेव भूयः ॥ १४ ॥
दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला ।
आभाति घेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥ १५ ॥
घेलानिल केतकरेणुभिस्ते
सम्भावयत्याननमाधताम्रि ।
सामस्तमं मण्डनपालहाने-
र्बिम्बाधरबन्धतृष्णम् ॥ १६ ॥

एते वयं सैकतभिन्नशुक्ति-
पर्यस्तमुक्तापटले पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगाद्
कूलं फलावर्जितपूगमालम् ॥ १७ ॥

कुरुष्व तावत्करभोरु पश्चा-
न्मार्गं मृगप्रेक्षिणि दृष्टिपातम् ।
एषा विदूरीभवतः समुद्राद्
सकानना निष्पतनीव भूमिः ॥ १८ ॥

क्वचित्पथा सञ्चरते सुराणां
क्वचिद् घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः
प्रवर्तते पश्य तथा विमानम् ॥ १९ ॥

असौ महेन्द्रद्विपदानगन्धी
-न्विमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थान्
आचामति स्वेदलवान्मुखे ते ॥ २० ॥

करेण वातायनलम्बितेन
स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।
आमुञ्चतोवाभरणं द्वितीयम्
उद्भिन्नविद्युद्वलयो घनस्ते ॥ २१ ॥

अमी जनस्थानमपोढविघ्नं
मत्वा समारब्धनवोटजानि ।

अध्यासते धीरभृतो यथास्वं
चिरोज्झितान्याश्रममण्डलानि ॥ २२ ॥
सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदर्शयत त्वच्चरणारविन्द-
विश्लेषदुःखादिव यद्धमौनम् ॥ २३ ॥
त्वं रक्षसा भीरु यतोऽपनीता
तं मार्गमेताः कृपया लतां मे ।
अदर्शयन् चक्षुमशक्नुवत्य
श्चाणाभिरावर्जितपल्लवाभिः ॥ २४ ॥
मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्तवागतिज्ञं समबोधयन्माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्याम्
उत्पक्ष्मराजीनि विलोचनानि ॥ २५ ॥
एतद्गिरेर्मौल्यवत पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ २६ ॥
गन्धश्च धाराहतपल्वलानां
कादम्बमर्धोद्गतकेशरञ्च ।
स्निग्धाश्च केकाः शिखिनां बभूवु-
र्पस्मिन्नसह्यानि विना त्वया मे ॥ २७ ॥

पूर्वानुभूतं स्मरता च यत्र
कण्ठोत्तरं भीरु तवोपगूढम् ।
गुहाविसारोत्थविवाहितानि
मया कथञ्चिद्वनगर्जितानि ॥ २८ ॥

आसारसिक्तक्षितिवाष्पयोगा-
न्नामत्तिणोद्गु यत्र विभिन्नरेखैः ।
विडम्ब्यमाना नरकन्दलैस्ते
विवाहधूमारुणलोचनश्रीः ॥ २९ ॥

उपान्तवानीरवनोपगूढा-
न्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतेव खेदा-
दनूनि पद्मासलिलानि दृष्टिः ॥ ३० ॥

अन्नाविधुक्तानि रथाङ्गनाम्नाम्
अन्योन्यदत्तोत्पलकेसराणि ।
छन्नानि दूरान्तरवर्तिना ते
मया प्रिये सस्पृहमीक्षितानि ॥ ३१ ॥

इमां तटाशोकलताञ्च तन्वीं
स्तनाभिरामस्तवकाभिनम्राम् ।
त्वत्सन्निधुद्धया परिरब्धुकामः
सौमित्रिणा साश्रुमहं निषिद्धः ॥ ३२ ॥

अमूर्विमानान्तरलम्बिनीनां
श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।

प्रत्युद्व्रजन्तीव समुत्पतन्त्यो
गोदावरीसारसपङ्क्तयस्त्वाम् ॥ ३३ ॥
यया त्वया पेशलमप्ययापि
घटाम्बुसंवर्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णसारा
दृष्टा चिरात्पञ्चवटी मनो मे ॥ ३४ ॥
अत्रानुगोदं मृगयानिवृत्त-
स्तरङ्गवातेन विनीतखेदः ।
रहस्यदुत्सङ्गनिषण्णमूर्ध्वं
स्मरामि धानीरगृहेषु सुप्तः ॥ ३५ ॥
भ्रूभेदमात्रेण पदान्मघोनः
प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भःपरिशुद्धिहेतो-
र्भीमो मुनेः स्यानपरिग्रहोऽयम् ॥ ३६ ॥
श्वेताग्निधूमाग्रमनिन्धकीर्तेः
स्तस्येदमाक्रान्तविमानमार्गम् ।
ज्ञात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा ॥ ३७ ॥
एतन्मुनेर्मानिनि शालकर्णेः
पञ्चाप्सरो नाम विहारवारि ।
आमाति पर्यन्तघनं विदूरा-
दम्भेयान्तरालस्थमिवेन्दुबिम्बम् ॥ ३८ ॥

पुरा स दर्भाङ्कुरमात्रवृत्ति-
श्चरन्मृगैः सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीतः
पञ्चाप्सरोयौवनकूटबन्धम् ॥ ३९ ॥

तस्यायमन्तर्हितसौधभाजः
प्रसक्तसङ्गीतमृदङ्गघोषः ।
वियद्वृतः पुष्पकचन्द्रशाला
क्षणं प्रतिध्वनमुखराः करोति ॥ ४० ॥

हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसस्तसप्तिः ।
असौ तपस्त्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ ४१ ॥

अमुं सहासप्रहितेक्षणानि
व्याजार्घसन्दर्शितमेखलानि ।
नालं विकर्तुं जनितेन्द्रियक्षं
सुराङ्गनाविभ्रमचेष्टितानि ॥ ४२ ॥

पयोऽब्दमालावलय मृगाणां
कण्डूयितारं कुशसूचिलावम् ।
समाजने मे भुजमूर्ध्वबाहुः
सव्येतरं प्राग्वमितः प्रयुङ्क्ते ॥४३॥

याचंयमत्वात्मगतिं ममैष
कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः ।

दृष्टिं विमानव्यवधानमुक्तां
पुनः सहस्रार्चिषि संविधत्ते ॥ ४४ ॥
अदः शरण्यं शरभङ्गनाम्न-
स्तपोवनं पावनमाहिताग्नेः ।
चिराय सन्तर्प्य समिद्भिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५ ॥
छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसम्भाव्यफलेष्वमीषु ।
तस्यातिथेर्नामधुना सपर्यां
स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६ ॥
धारास्यनोद्गारिदरीमुखोऽसौ
शृङ्गामलन्नाम्बुदवप्रपङ्क्तिः ।
बभाति मे धन्वुरगाधि चक्षु-
र्दूरं फलुघ्नानिव चित्रकूटः ॥ ४७ ॥
एषा प्रसन्नस्तिमितप्रवाहा
सरिद्वधूरान्तरमावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥ ४८ ॥
अयं सुजातोऽनुगिरं तमालः
प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुरपोलशोभी
मयायतस्ते परिकल्पितस्ते ॥ ४९ ॥

अनिग्रहत्रासविनीतसत्त्वम्
अपुष्पलिङ्गारफलबन्धिवृत्तम् ।
वनं तपःसाधनमेतदन्ते-
वाविष्कृतोदग्रतरप्रभावम् ॥ ५० ॥

अत्राभिषेकाय तपोधनानां
सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानुसूया
त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ ५१ ॥

धीरासनैर्ध्यानजुषामृषीणाम्
अमी समाध्यासितवेदिमध्याः ।
नियातनिष्कम्पतया विभान्ति
योगाधिरूढा इव शाखिनोऽपि ॥ ५२ ॥

त्वया पुरस्तादुपयाचितो यः
सोऽयं वरः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥ ५३ ॥

क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयो यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानाम्
इन्दीवरैरुत्खचितान्तरेव ॥ ५४ ॥

क्वचित्खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः ।

अन्यत्र कालागुरुदत्तपत्र
भक्तिर्भुवश्चन्दनकल्पितेव ॥ ५५ ॥
क्वचित्प्रभा चान्द्रमसी तमोभि-
श्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ ५६ ॥
क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः ॥ ५७ ॥
समुद्रपत्न्योर्जलसन्निपाते
पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूय-
स्तनुत्यजां नास्ति शरीरबन्धः ॥ ५८ ॥
पुरं निषादाधिपतेरिदं तद्
यस्मिन्मया मौलिमणिं विहाय ।
जटासु यद्बाष्पजलप्लुतासु
कैकेयि कामाः फलितास्तवेति ॥ ५९ ॥
पयोधरैः पुण्यजनाङ्गनानां
निर्विष्टहेमाम्बुजरेणु यस्याः ।
आक्षं सरः कारणमास्ववाचो
युद्धेरिवाव्यक्तमुदाहरन्ति ॥ ६० ॥

जलानि या तीरनिखातयूपा
घहत्ययोध्यामनु राजधानीम् ।
तुरङ्गमेधावभृथावतीर्णै-
रिज्वाकुभिः पुण्यतरीकृतानि ॥ ६१ ॥

यां सैकतोत्सङ्गसुखोचितानां
प्राज्यैः पयोभिः परिवर्धितानाम् ।
सामान्यधात्रीमिव मानसं मे
सम्भावयत्युत्तरकोशलानाम् ॥ ६२ ॥

सेयं मदीया जननीव तेन
मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां
तरङ्गहस्तैरुपगूहतीव ॥ ६३ ॥

विरक्तसन्ध्याकपिशं पुरस्ताद्
यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः
प्रत्युद्गतो मां भरतः ससैन्यः ॥ ६४ ॥

अद्धा श्रियं पालितसङ्गराय
प्रत्यर्पयिष्यत्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन्
संरक्षितां त्वामिव लक्ष्मणो मे ॥ ६५ ॥

असौ पुरस्कृत्य गुरुं पदातिः
पश्चाद्व्यवस्थापितवाहिनीकः ।

वृद्धैरमात्यै सह चीरवासा
मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥ ६६ ॥
पित्रा विसृष्टां मदपेक्षया यः
श्रियं युवाप्यङ्गगतामभोक्ता ।
यन्ति वर्षाणि तया सहोग्रम्
अभ्यस्यतीव व्रतमासिधारम् ॥ ६७ ॥
एतावदुक्त्वति दाशरथौ तदीयाम्
इच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयामि-
र्बद्धोत्सवं प्रकृतिभिर्भरतानुगामिः ॥ ६८ ॥
तस्मात्पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्त ।
यानादवातरददूरमहीतलेन
मार्गेण भक्तिरचितस्फटिकेन रामः ॥ ६९ ॥
इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ
तद्दत्तपोढपितृराज्यमहाभिषेके ॥ ७० ॥
श्मश्रुप्रवृद्धिजनिताकृतिविक्रियांश्च
सद्यान्प्ररोहजटिलानिव मन्त्रिवृद्धान् ।
अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैः
धार्तानुयोगमधुराक्षरया च वाचा ॥ ७१ ॥

दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एव समरेषु पुरःप्रहर्ता ।
इत्यादृतेन कथितो रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ ७२ ॥

सौमित्रिणा तदनु संसस्वजे स चैनम्
उत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन
क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥ ७३ ॥

रामाज्ञया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुराकरुहुर्गजेन्द्रान् ।
तेषु क्षरत्सु बहुधा मदवारिधाराः
शैलाधिरोहणसुखान्युपलेभिरे ते ॥ ७४ ॥

सानुप्लवः प्रभुरपि क्षणदाचराणां
भेजे रथान्दशरथप्रभवानुशिष्टः ।
मायाविकल्परचितैरपि ये तदीयै-
र्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥ ७५ ॥

भूयस्ततो रघुपतिर्विलसत्पताकम्
अध्यास्त कामगति सावरजो विमानम् ।
दोषातनं बुधबृहस्पतियोगदृश्य-
स्तापापतिस्तरलविद्युदिवाम्रवृन्दम् ॥ ७६ ॥

वज्रेश्वरेण जगतां प्रलयादिवोर्वी
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।

रामेण मैथिलसुतां दशकण्ठहच्छ्रात्
प्रत्युद्गतां धृतिमतीं भरतो ववन्दे ॥ ७७ ॥
लङ्केश्वरप्रणतिभङ्गदृढव्रतं तद्
वन्द्यं युगं चरणयो र्जनकात्मजायाः ।
ज्येष्ठानुवृत्तिजटितं च शिरोऽस्य साधो-
रन्योन्यपावनमभूदुभयं समेत्य ॥ ७८ ॥
कोशार्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्यमार्यः
साकेतोपवनमुदारमध्युवास ॥ ७९ ॥

पार्वती-तपश्चर्या ।

तया समत्व दहता मनोभव
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूप हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
इयेष सा कर्तुमवन्ध्यरूपता
समाधिमास्थाय तपोभिरात्मन ।
अवाप्यते वा कथमन्यथा द्वय
तथाविध प्रेम पतिश्च तादृश ॥ २ ॥
निशम्य चैना तपसे कृतोद्यमा
सुता गिरीशप्रतिलब्धमानसाम् ।
उवाच मेना परिरभ्य बाहुना
निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥
मनीषिता सन्ति गृहेषु देवता
स्तप क्व वत्से क्व च तावक वपु ।
पद सहेत भ्रमरस्य पेलव
शिरीषपुष्प न पुन पतत्रिण ॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुता
शशाक मेना न नियन्तुमुद्यमात् ।

क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निस्रामभिमुखं प्रतीपयेत् ॥ ५ ॥
कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥ ६ ॥
अथानुरूपाभिनिवेशनोपिता
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथित तदाख्यया
जगाम गौरीशिखरं शिवप्रियम् ॥ ७ ॥
विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलम्बितं चन्दनम् ।
वदन्ध बालारुणमम्बु धत्कलं
पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥
यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूच्चदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥
प्रतिक्षणं सा कृतरोमविक्रियां
बलाय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम् ॥ १० ॥

विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽस्त्रसूत्रप्रणयी तया करः ॥ ११ ॥

महार्हशय्यापरिवर्तनच्युतै
स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ॥ १२ ॥

पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥

अतन्द्रिता सा स्वमपेय वृत्तकान्
घटस्तनप्रस्रवणैर्न्यवर्धयत् ।
गुहोऽपि येषां प्रथमात्मजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनामिमीत लोचने ॥ १५ ॥

कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम् ।

दिदृक्षवस्तामृषयोभ्युपागमन्
न धर्मवृद्धेषु वय समीक्ष्यते ॥ १६ ॥
विरोधिसत्त्वोज्झितपूर्वमत्सर
द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसम्भृतानल
तपोधन तच्च बभूव पावनम् ॥ १७ ॥
यदा फल पूर्वतप समाधिना
न तावता लभ्यममस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमार्दव
तपो महत्सा चरितु प्रचक्रमे ॥ १८ ॥
क्रम यथौ कन्दुकलीलयापि या
तया मुनीना चरित व्यगाहत ।
भुव वपु काञ्चनपद्मनिर्मित
मृदु प्रकृत्या च ससारमेव च ॥ १९ ॥
शुचौ चतुर्णा ज्वलता हविर्भुजा
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभाम्
अनन्यदृष्टि सवितारमैक्षत ॥ २० ॥
तथाभितप्त सवितु गभस्तिभि
र्मुख तदीय कमलश्रिय दधौ ।
अपाङ्गयो केवलमस्य दीर्घयो
शनै शनै श्यामिकया कृत पदम् ॥ २१ ॥

अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मय ।
बभूव तस्याः किल पारणाविधि-
र्न वृत्तवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥
निकामतप्ता द्विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा ।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणमुञ्झदूर्ध्वगम् ॥ २३ ॥
स्थिताः क्षण पद्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥ २४ ॥
शिलाशया तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितेस्तडिन्मरै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥
निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥
मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपल्लवोभिना ।

तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥ २७ ॥
स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
बभूवतुर्वृक्षजलैः पुराविदः ॥ २८ ॥
मृणालिकापेलवमेवमादिभि-
र्व्रतैः क्षमक्लमपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥
अथाजिनाषाढधरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्ध प्रथमाश्रमो यथा ॥ ३० ॥
तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रम नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमम् ॥ ३२ ॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥
अपि त्वदावर्जितवारिसम्भृतं
प्रवालमासामनुबन्धि बीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥
अपि प्रसन्नं हरिणेषु ते मन.
फलस्यदर्शनव्यापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनै-
स्त्वदाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥
यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥
विकीर्णसप्तर्षिवलिप्रहासिभि-
स्तया न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥
अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि ।

त्वया मनो निर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥
प्रयुक्तसत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि ।
यतः सतां सप्तपगामि सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥
अतोऽत्र किञ्चिद् भयतीं यदुद्यमां
द्विजातिभावादुपपन्नचापल ।
अयं जन प्रष्टुमनास्तपोधने
न चेद्रहस्य प्रतिवक्तुमर्हसि ॥ ४० ॥
कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नव वय-
स्तप.फलं स्यात् किमतः पर वद ॥ ४१ ॥
भवत्यनिष्टादपि नाम दु:सहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि त्वयि ॥ ४२ ॥
अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत्पन्नगरत्नसूचये ॥ ४३ ॥

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥

निवेदितं निःश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥

अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७ ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकरोष्ट्रप्रविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ४८ ॥

अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यच्चतरावलोकिनः ।

करोति लक्ष्य चिरमस्य चक्षुषो
न वक्तुमात्मीयमरालपक्ष्मणः ॥ ४९ ॥
कियच्चिरं शाम्यसि गौरि चिन्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व कांक्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥
इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंभितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
चिरर्तितानयननेनमंचत ॥ ५१ ॥
सखी तदीया नमुवाच वर्णिनं
निबोध साधो नय चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं
कृत तप साधनमेतया वपुः ॥ ५२ ॥
इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणि पतिमाप्तुमिच्छति ॥ ५३ ॥
असह्यहुङ्कारनिवर्तित. पुरा
पुरारिमप्राप्तमुख शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणोद्-
विशीर्णमूर्त्तेरपि पुष्पधन्वनः ॥ ५४ ॥

तदा प्रभृत्युन्मदना ।पतुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसंघातशिलातलेष्वपि ॥ ५५ ॥

उपात्तवर्णे चरिते ।पनाकिनः
सवाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किन्नरराजकन्यका
वनान्तसङ्गीतसखीरुदैरयत् ॥ ५६ ॥

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धनः ॥ ५७ ॥

यदा वृथैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहासाभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।

न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंभवः ॥ ६० ॥
न वेद्मि सा प्रार्थितदुर्लभः कदा
सखीभिरुच्चैरभिदोचरीकृताम् ।
तप इयामभ्युपपत्स्यते सखी
घृणेव सीता तदधमर्हताम् ॥ ६१ ॥
अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमाम्
अपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥
अथामहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥
यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥
अथाह सा विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ६५ ॥

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवद्भ्रुलतं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चितासंस्तरजः करिष्यति ॥ ६९ ॥

इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।

कला च सा कान्तिमतो कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥
वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्त्रमपि त्रिलोचने ॥ ७२ ॥
निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसङ्गिया ॥ ७३ ॥
इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
त्रिलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥
उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥ ७५ ॥
विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥ ७६ ॥

अकिञ्चन सन् प्रभवः स सम्पदां
त्रिलोकनाथ पितृसद्मगोचरः ।
स भीमरूप शिव इत्युदीर्यते
न सन्ति याथार्थ्यविद पिनाकिनः ॥ ७७ ॥

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपु ॥ ७८ ॥

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युत
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

असम्पदस्तस्य वृषेण गच्छत
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ॥ ८० ॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीश प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥

अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु स ।

ममाद्य भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥
निवायतामालि किमप्ययं बटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥८३ ॥
इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां हृतस्मितः
समालालम्बे वृषराजकेतनः ॥ ८४ ॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥
अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवता विधत्ते ॥ ८६ ॥

प्रस्थानकौतुकम् ।

(अथ प्रविशत कुसुमावचय नाटयन्त्यौ सख्यौ) ।

अनसूया—प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्या-
ण शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे
हृदयं तथाप्येतावच्चिन्तनीयम् ।

प्रियंवदा—कथमिव ।

अनसूया—अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसृष्ट
आत्मनो नगरं प्रविश्यान्त पुरसमागत इतोगतं वृत्तान्तं
स्मरति वा न वेति ।

प्रियंवदा—विस्रब्धा भव । न तादृशा आकृतिविशेषा गुण-
विरोधिनो भवन्ति । तात इदानीमिमं वृत्तान्तं श्रुत्वा न
जाने किं प्रतिपत्स्यत इति ।

अनसूया—यथाहं पश्यामि तथा तस्यानुमतं भवेत् ।

प्रियंवदा—कथमिव ।

अनसूया—गुणवते कन्यका प्रतिपादनीयेति प्रथमः सङ्कल्पः ।
तं यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरु-
जनः ।

प्रियंवदा—(पुष्पभाजनं विलोक्य) सखि, अवचितानि बलि-
कर्मपर्याप्तानि कुसुमानि ।

अनसूया—ननु प्रियसख्या शकुन्तलाया. सौभाग्यदेवताऽर्च्ये-
नीया ।

प्रियंवदा—युज्यते । (तदेव कर्माभिनयतः ।)

(नेपथ्ये)—अयमहं भो. ।

अनसूया—(फलं दत्त्वा) सखि, अतिथीनामिव निवेदितम् ।

प्रियंवदा—ननूटजे सन्निहिता शकुन्तला । (आत्मगतम्)
अद्य पुनर्हृदयेनासन्निहिता ।

अनसूया—भवतु, अलमेतावद्भि' कुसुमैः । प्रस्थिते ।)

(नेपथ्ये)—आ. अतिथिपरिभाविनि,
विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्त. प्रथम कृतामिव ॥ १ ॥

प्रियंवदा—हा धिक्, हा धिक्, अप्रियमेव सवृत्तम् । कस्मि-
न्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला । (पुरोऽवलोक्य)
न खलु यस्मिन् कस्मिन्नपि । एष दुर्वासा. सुलभकोपो
महर्षि' । तथा ह्यल्पाऽविरलपादत्वरया गत्या प्रतिनिवृत्तः ।
कोऽन्यो हुतवदाहग्धु प्रभवति ।

अनसूया—गच्छ पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोद-
कमुपकल्पयामि ।

प्रियंवदा—तथा । (निष्क्रान्ता ।)

अनसूया—(पदान्तरे स्खलितं निरूप्य) अहो आवेगस्त-

लितया गत्या प्रस्थितं मेऽग्रहस्तान्पुष्पभाजनम् । (पुष्पोच्चयं रूपयति ।)

(प्रविश्य) प्रियंवदा—सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति । किमपि पुन सानुक्रोशः कृतः ।

अनसूया—(सस्मितम्) तस्मिन्यद्येतदपि । कथय ।

प्रियंवदा—यदा निवर्तितु नेच्छति तदा विज्ञातितो मया 'भगवन्, प्रथममिति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्यः' इति ।

अनसूया—ततस्ततः ।

प्रियंवदा—ततो 'मम वचनमन्यथा भवितुं नार्हति किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते' इति मन्त्रयमाणः स्वयमन्तर्हितः ।

अनसूया—शक्यमिदानीमाश्वसितुम् । अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन्स्वार्थानोपाया शकुन्तला भविष्यति ।

प्रियंवदा—सखि, पहि देवकार्यं तावदस्या निर्वर्तयावः ।

(परिक्रामत ।)

प्रियंवदा—(अवलोक्य) अनसूये, प्रेक्षस्व तावद्बामहस्तोपहितवदनाऽऽलिखितेव प्रियसखी । भर्तृगतया चिन्तया आत्मानमपि नैषा विभावयति किं पुनरागन्तुकम् ।

अनसूया—प्रियंवदे, द्वयोरेव नौ मुखे एष वृत्तान्तश्चिन्त्यतु ।
रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी ।

प्रियंवदा—क इदानीमुष्णोदकेन नवमालिकां सिञ्चति ।

(उभे निष्क्रान्ते ।)

विष्कम्भकः ।

(ततः प्रविशति सुप्तोत्थितः शिष्यः ।)

शिष्यः—येनोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासाद्उपावृत्तेन काश्यपेन । प्रकाशं निर्गतस्तावद्वलोकयामि कियद्वशिष्टं रजन्या इति । (परिक्रम्यावलोक्य च) हन्त प्रभातम् । तथा हि ।

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥ २ ॥

अपि च—

अन्वह्नितेऽपि शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ॥ ३ ॥

अपि च—

कर्कन्धूनामुपरि तुहिनं रक्षयत्यभ्रसन्ध्या
दाभं मुञ्चत्युटजपटलं वीतनिद्रो मयूरः ।
वेदिप्रान्तात्खुरविलिखितादुत्थितश्चैप सद्यः
पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः ॥४॥

(प्रविश्यापटीक्षेपेण)

अनसूया—यद्यपि नाम विषयपराङ्मुखस्य जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम् ।

शिष्य.—यावदुपस्थितां होमवेलां गुरवे निवेदयामि । (निष्क्रान्तः)

अनसूया—प्रतिबुद्धापि किं करिष्यामि । न मे उचितेष्वपि निजकरणीयेषु हस्तपादं प्रसरति । काम इदानीं सकामो भवतु येनासत्यसन्धे जने शुद्धहृदया सखी पदं कारिता । अथवा दुर्वाससः शाप एप विकारयति । अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावतः कालस्य लेखमात्रमपि न विसर्जयति । (विचिन्त्य) तदितोऽभिज्ञानमङ्गुलीयकं तस्मै विसृजाम । दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम् । ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम् । इत्थंगतेऽस्माभिः किं करणीयम् ।

(प्रविश्य) प्रियंवदा—(सहर्षम्) सखि, त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम् ।

अनसूया—सखि, कथमेतत् ।

प्रियंवदा—शृणु । इदानीं सुरभयितमल्लिका शकुन्तला-
सकाशं गतास्मि ।

अनसूया—ततस्ततः ।

प्रियंवदा—तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं तात-
काश्यपेन एवमभिनन्दितम् 'दिष्ट्या धूमाकुलितदृष्टेरपि
यजमानस्य पावक एवाहुति पतिता । यत्से, सुशिष्यपरि-
दत्तेव विद्या शशोचनीयासि संवृत्ता । अथैव ऋषिप्रति-
रक्षितां त्वां भर्तुः सकाशं विसर्जयामि' इति ।

अनसूया—अथ केन सूचितस्तातकाश्यपस्य वृत्तान्त' ।

प्रियंवदा—अग्निशरणं भविष्यस्य शरीर विना छन्दोमय्या वाचा ।

अनसूया—(सविस्मयम्) कथय ।

प्रियंवदा—दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ५ ॥

अनसूया—(प्रियंवदामाश्लिष्य) सखि, प्रियं मे प्रियं मे । कि-
मत्यर्थमेव शकुन्तला नीयते इत्युत्कण्ठासाधारणं परि-
तोषमनुभवामि ।

प्रियंवदा—सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः । सा
तपस्विनी निर्वृता भवतु ।

अनसूया—तेन हि एतस्मिंश्चूतशाखावलम्बिते नारिकेलसम्पुटके
एतन्निमित्तमेव कालान्तरदत्ता निक्षिप्ता मया केशरमालिका ।
तदिमां हस्तसन्निहितां कुरु । यावदहमपि मृगरोचना
तीर्थमृत्तिका दूर्वाकिसलयानीति मङ्गलसमालम्भनानि
विरचयामि ।

प्रियंवदा—तथा क्रियताम् ।

(अनसूया निष्क्रान्ता । प्रियंवदा नाट्येन सुमनसो गृह्णाति ।)

(नेपथ्ये)—गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्त-
लानयनाय ।

प्रियंवदा—(कर्णं दत्त्वा) अनसूये, त्वरस्व त्वरस्व । एते खलु
हस्तिनापुरगामिन ऋषय शब्दायन्ते ।

(प्रविश्य समालम्भनहस्ता) अनसूया-सखि, एहि गच्छावः ।

(परिक्रामतः ।)

प्रियंवदा—(विलोक्य) एषा सूर्योदय एव शिखामञ्चिता
प्रलोष्टनीवारहस्तामि स्वस्तिवाचनिकामिस्तापसीभिरभिन-
न्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एनाम् ।

(उपसर्पतः ।)

(ततः प्रविशति यथोद्दिष्टव्यापाराऽऽसनस्था शकुन्तला ।)

(शकुन्तलां प्रति) तापसीनामन्यतमा—जाते, भर्तुर्बहुमानसूचकं
महादेवीशब्दं लभस्व ।

द्वितीया—वत्से, वीरप्रसविनी भव ।

तृतीया—वत्से, भर्तुर्बहुमता भव ।

(आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः ।)

सख्यौ—(उपसृत्य) सखि सुखमज्जनं ते भवतु ।

शकुन्तला—स्वागतं मे सखीभ्याम् । इतो निषीदतम् ।

सख्यौ—(मङ्गलपात्राण्यादायोपविश्य) सखि, सज्जा भव
यावन्मङ्गलसमालम्भनं विरचयावः ।

शकुन्तला—इदमपि खलु मन्तव्यम् । दुर्लभमिदानीं मे सखीम-
एडनं भविष्यति । (घाष्प विकृजति ।)

सख्यौ—सखि, उचित न ते मङ्गलकाले रोदितुम् । (अश्रूणि
प्रमृज्य नाट्येन प्रसाधयत' ।)

प्रियंवदा-आभरणोचितं रूपमाश्रमसुलभै प्रसाधनै विप्रकार्यते ।
(प्रविश्योपायनहस्तौ) ऋषिकुमारकौ—इदमलङ्करणम् ।
अलङ्क्रियतामनघमहती । (सर्वा विलोक्य विस्मिता ।)

गौतमी—वत्स नारद, कुत एतत् ।

प्रथमः—तातकाश्यपप्रभावात् ।

गौतमी—किं मानसी सिद्धिः ।

द्वितीय.—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः 'शकुन्त-
लाहेतोर्वनस्पतिभ्यः कुसुमान्याहरत' इति । तत इदानीम्—

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥ ६ ॥

प्रियंवदा—(शकुन्तलां विलोक्य) हला, अनयाऽभ्युपपत्त्या
सूचिता ते भर्तुर्गृहेऽनुभवितव्या राजलक्ष्मीः । (शकुन्तला
व्रीडां रूपयति ।)

प्रथमः—गौतम, पह्लवभिरुत्कीर्णाय काश्यपाय वनस्पतिसेवां
निवेदयावः ।

द्वितीयः—तथा । (निष्क्रान्तौ ।)

सख्यौ—अये, अनुपभुक्तभूषणोऽयं जन. । चित्रकर्मपरिचये-
नाङ्गेषु ते आभरणविनियोगं कुर्वः ।
शकुन्तला—जाने वां नैपुणम् । (उभे नाटयेनालङ्कुरुतः) ।
(ततः प्रविशति स्नानार्तीर्णः काश्यपः ।)
काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥७॥
(परिक्रामति ।)

सख्यौ—हला शकुन्तले, अवसितमण्डनासि । परिधेहि
साम्प्रतं क्षौमयुगलम् । (शकुन्तला उत्थाय परिधत्ते ।)
गौतमी—जाते, एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वज-
माल इव गुरुरुपस्थितः । आचारं तावत् प्रतिपद्यस्व ।
शकुन्तला—(सव्रीडम्) तात, वन्दे ।
काश्यपः—ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ८ ॥
गौतमी—भगवन्, वरः खल्वेष न आशीः ।
काश्यपः—वत्से, इतः सयोहुतानग्नीन् प्रदक्षिणीकुरुष्व ।
(सर्वे परिक्रामन्ति) ।
काश्यपः—(ऋक्छन्दसाऽऽस्ते)

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।

अपाग्नन्तो दुरित हव्यगन्धै-
र्धैतानास्त्या यहय पाययन्तु ॥ ६ ॥

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्रा ।

(प्रविश्य) शिष्य —भगवन्, इमे स्म ।

काश्यप —भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरव —इत इतो भवतो । (सर्वे परिक्रामन्ति ।)

काश्यप —भो भो सन्निहितास्तपोवनतरव ,

पातुन प्रथम व्यवस्यति जल युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवता स्नेहेन या पल्लवम् ।
आद्ये व कुसुमप्रवृत्तिसमये यस्या भवत्युत्सव
सेय याति शकुन्तला पतिगृह सर्वनुज्ञायताम् ॥ १० ॥

(कोकिलरव सूचयित्वा)

अनुमतगमना शकुन्तला
तरुभिरिय वनवासबन्धुभि ।
परभृतविरुत यत
प्रतिवचनीकृतमेभिरात्मन ॥ ११ ॥

(आकाशे)—

रम्यान्तर. कमलिनीहरितै सरोभि
श्छायाद्रुमैर्नियमिताकमयूखताप ।
भूयात् कुशशयरजोमृदुरेणुरस्या
शान्तानुकूलपवनश्च शिवश्च पन्था ॥ १२ ॥

(सर्वे सविस्मयमाकर्णयन्ति ।)

गौतमी—जाते, ज्ञातिजनस्निग्धाभिरनुमतगमनासि तपोवनदेवताभिः । प्रणम भगवतीः ।

शकुन्तला—(सप्रणामं परिक्रम्य—जनान्तिकम्) हला प्रियंवदे, नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

प्रियंवदा—न केवलं तपोवनविरहकातरा सख्येव । त्वया उपस्थितवियोगस्य तपोवनस्याप्यवस्थां प्रेक्षस्व तावत् ।

उद्गलितदर्भकवला मृगी परित्यक्तनर्तना शिखिनी ।
अवशीर्णपाण्डुपर्णा मुञ्चत्यश्रुमिव लता ॥ १३ ॥

शकुन्तला—(स्मृत्वा) तात, लतामगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये ।

काश्यपः—अयमेमि ते तस्यां सोदर्यस्नेहम् । इयं तावद्दक्षिणेन ।

शकुन्तला—(उपेत्य लतामालिङ्गय) वनज्योत्स्ने, चूतसङ्गतापि मां प्रत्यालिङ्ग इतोगताभिः शाखाबाहुभिः । अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि ।

काश्यपः—सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेयम्
अस्यामहं त्वयि च सम्प्रति वीतचिन्तः ॥ १४ ॥

इतः पन्थानं प्रतिपद्यस्व ।

शकुन्तला—(सख्यौ प्रति) हला, पश्य द्वयोर्युवयोर्हस्ते निक्षेपः ।

सख्यौ—अयं जनः कस्य हस्ते समर्पितः (बाष्पं विहरतः ।)

काश्यपः—अनसूये, प्रियंवदे, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला । (सर्वे परिक्रामन्ति ।)

शकुन्तला—तात, एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृग-वधूर्यदा प्रसवा भवति तदा मे कमपि प्रियनिवेदयितारं विसर्जयिष्यथ ।

काश्यपः—नेद विस्मरिष्यामः ।

शकुन्तला—(गतिभङ्गं रूपयित्वा) को नु खल्वेष निवसने मे सजति । (परावर्तते ।)

काश्यप—वत्से,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १५ ॥

शकुन्तला—वत्स, किं सहवासपरित्यागिनीं मामनुसरसि । अचिरप्रसूतया जनन्या विना चिवर्धितः एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।

(रुदती प्रस्थिता ।)

काश्यपः—वत्से,

उत्पक्ष्मणोर्नयनयोरपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम् ।
असिञ्चलद्भितनतोचतभूमिभागे
मार्गं पदानि खलु ते विषमीभवन्ति ॥ १६ ॥

शार्ङ्गरव—भगवन्, श्रोदकान्तं शिष्यो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम् । अत्र सन्दिश्य प्रतिगन्तुमर्हसि ।

काश्यपः—तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम् । (चिन्तयति ।)

शकुन्तला—(जनान्तिकम्) हला, शेक्षस्व । नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरटति । दुष्करमहं करोमि ।

अनसूया—सखि, मा एवं मन्त्रयस्व ।

एषापीष्टेन विना गमयति रजनीं विषाददीर्घतराम् ।
गुरुकमपि विरहदुःखं ह्याशाबन्धो विषाद्यति ॥ १७ ॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयतु भगवान् ।

काश्यपः—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १८ ॥

शार्ङ्गरवः—गृहीतः सन्देशः ।

काश्यपः—यत्से, त्वमिदानीमनुशासनीयासि । यतोऽसोऽपि सन्तो लौकिकता वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१८॥

कथं वा गौतमी मन्यते ।

गौतमी—एतावान् वधूजनस्योपदेशः । जाते, पतिं कुरु संभ्रमधारय ।

काश्यपः—यत्से, परिष्वजस्व मां सखीजनञ्च ।

शकुन्तला—तात, इत एव किं प्रियंवदानिभाः सख्यो निर्वर्तिष्यन्ते ।

काश्यपः—यत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य) कथमिदानीं तातस्याङ्गात्प-रिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।

काश्यपः—यत्से, किमेवं कातरासि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।

तनयमचिरात् प्राचींवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥२०॥

(शकुन्तला पितुः पादयोः पतति ।)

काश्यपः—यदिच्छामि ते तदस्तु ।

शकुन्तला—(सख्यावुपेत्य) हला, द्वे अपि मां सममेव परिष्वजेथाम् ।

सख्यौ—(तथा कृत्वा) सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्यतो भवेत् ततस्तस्मै इदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।

शकुन्तला—अनेन सन्देहेन घामाकम्पितास्मि ।

सख्यौ—मा विभेहि । स्नेहः पापशङ्की ।

शार्ङ्गरवः—युगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

काश्यपः—श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ २१ ॥

गौतमी—जाते, परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषा एवं मन्त्रयिष्यते । निवर्ततां भवान् ।

काश्यपः—वत्से, उपरुध्यते तपोऽनुष्ठानम् ।

शकुन्तला—(भूय. पितरमाश्लिष्य) तपश्चरणकृशं तातगात्रम् । तन्माऽतिमात्रं मम कृते उत्कण्ठस्व ।

काश्यप—(सनिःश्वासम् ।

शमप्येष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारि विरूढ,नीवारवर्ति विलोकयतः ॥ २२ ॥

गच्छ । शिवास्ते पन्थान सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च ।)

सख्यौ—(शकुन्तलां विलोक्य) हा धिक्, हा धिक् । अन्तरिता शकुन्तला घनराज्या ।

काश्यपः—(सनिःश्वासम्) अनसूये, प्रियंवदे, गता वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं माम् ।

(सर्वे प्रस्थिता. ।)

उभे—तात, शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः ।

काश्यपः—स्नेहप्रवृत्तिरेवदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः शकुन्तलां पतिकुलं विसृज्य सम्प्रधमिदानीं स्वास्थ्यम् । कुतः ।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥ २३ ॥

(निष्क्रान्ताः सर्वे ।)

दुर्योधन-निर्वेदः ।

(अथ प्रविशति प्रहारमूर्च्छितं रथस्थं दुर्योधनमपहरन् सूतः)।

सूतः—(ससम्भ्रमं परिक्रम्यावलोक्य च) अये, अयमसौ सरसीसरोजविलोलनसुरभिशीतलमातरिश्वसंवाहितसान्द्र किसलयो न्यग्रोधपादपः । उचिता विश्रामभूमिरियं समरव्यापारखिन्नस्य वीरजनस्य । अत्र स्थितश्छायाचि-तालवृन्तेन हरिचन्दनच्छटाशीतलेनाप्रयत्नसुरभिणा दशापरिणामयोग्येन सरसीसमीरणेनामुना गतक्लमो भविष्यति महाराजः । लूनकेतुश्छायां रथोऽनिवारित पथं प्रवेक्ष्यति छायाम् । (प्रवेशं रूपयित्वा राजानमवलोक्य) कथमद्यापि चेतनां न लभते महाराजः । भोः कष्टम् ।

(निश्वस्य)

मदकलितकरेणुभज्यमाने
विपिन इव प्रकटैकशालवृक्षे ।
हतसकलकुमारके कुलेऽस्मि-
स्त्वमपि विधेरवलोकितः कटाक्षैः ॥ १ ॥

आकाशे लक्ष्यं बद्ध्वा) ननु भो हतविधे, भरतकुलविमुख,

अक्षतस्य गदापाणेरनारूढस्य संशयम् ।
एषापि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया ॥ २ ॥

दुर्योधनः—(शनैरुपलभ्य संज्ञः) आ शक्तिरस्ति दुरात्मनो वृकोदरहतकस्य मयि जीवति दुर्योधने प्रतिज्ञां पूर-

दुर्ललित, हा अप्रतिकुलगजघटामृगेन्द्र, हा युवराज, क्वासि । प्रयच्छ मे प्रतिवचनम् । (मोहमुपगतः ।) ,

सूतः—राजन्, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—(संज्ञां लब्ध्वा—निःश्वस्य)

मुक्तो यथेष्टमुपभोगसुखेषु नैव
त्वं लालितोऽपि हि मया न वृथाग्रजेन ।
अस्यास्तु वत्स तव हेतुरहं विपत्ते-
र्यत्कारितोऽस्यविनयं न च रक्षितोऽसि ॥४॥ (पतति)

सूतः—आयुष्मन्, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—धिक् सूत, किमनुष्ठितं भवता ।

रक्षणीयेन सततं बालेनाहमनुवर्तिना ।
दुःशासनेन भ्रात्राहमुपहारेण रक्षितः ॥ ५ ॥

सूतः—देव, मर्मभेदिभिरिषुतोमरशक्तिप्रासवर्षैर्महारथानामपहृ-
तचेतनत्वान्निश्चेष्टः कृतो महाराज इत्यपहृतो मया रथः ।

दुर्योधनः—सूत, विरूपं कृतवानसि ।

तस्यैव पाण्डवपशोरनुजद्विषो मे
भोमैर्गदाशनिकृतैर्न विबोधितोऽस्मि ।
तामेव नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदहमाशु वृकोदरो वा ॥ ६ ॥

(निःश्वस्य नभो विलोक्य) ननु भो हतविधे, कृपावि-रहित, भरतकुलविमुख,

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः ।

सूतः—शान्तं पापं शान्तं पापम् । महाराज, किमिदम् ।

दुर्योधनः—घातिताशेषबन्धोर्मे किं राज्येन जयेन वा ॥ ● ॥

(ततः प्रविशति सप्रहारः पुरुषः)

पुरुषः—आर्या, अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभिर्महाराजदुर्योधनो न वा । (निरूप्य) कथं न कोऽपि मन्त्रयते । भवतु । एतेषां यद्धपरिश्रान्तानां पुरुषाणां समूहो दृश्यते । अत्र गत्वा प्रदर्शयामि । (परिक्रम्य विलोक्य च) कथमेते खलु स्वामिनो गाढप्रहारहतस्य घनसन्नाहजातदुर्मदमुखैः कङ्कवक्त्रैर्हृदयाच्छल्यान्युद्धरन्ति । तन्न खल्वेते जानन्ति । भवतु । अन्यतो विचेष्यामि । (अग्रतोऽवलोक्य किञ्चित्परिक्रम्य) इमे खल्वपरे प्रभूतनराः संगता घोरमनुष्या दृश्यन्ते । तदत्र गत्वा प्रदर्शयामि । (उपगम्य) हंहो, जानीथ यूयं कस्मिन्नुद्देशे कुरुनाथो वर्तते इति । कथमेतेऽपि मां प्रेक्ष्याधिकतरं रुदन्ति । तन्न खल्वेतेऽपि जानन्ति । (दृष्ट्वा) हा, अतिकरुणं खल्वत्र वर्तते । एषा घोरमाता समरविनिहतं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया समप्रभूषणया पत्त्या सहानुम्रियते । (सश्लाघम्) साधु घोरमातः साधु । अन्यस्मिन्नपि जन्मान्तरेऽनिहतपुत्रका भविष्यसि । भवतु । अन्यत्र प्रदर्शयामि । (अन्यतो विलोक्य) अयमपरो बहुप्रहारनिहतकायोऽकृतव्रणबन्ध एव योधसमूह इमं शल्यामनं तुरङ्गममुपालभ्य रोदिति । नूनमेनेषामयमेव स्वामी व्यापादितः । तन्न खल्वेतेऽपि जानन्ति । भवतु ।

अन्यतो गत्वा प्रदयामि । (सर्वतो विलोक्य) कथं सर्वं पदावस्थानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जनः । तत्कमिदानीमत्र प्रदयामि । कं वोपालम्भे । भवतु । स्वयमेवात्र विचेष्यामि । (परिक्रम्य) भवतु । दैवमिदानीमुपालम्भे । हंहो दैव, एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणकराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथ्वीमण्डलैकनाथो महाराजदुर्योधनोऽप्यन्विष्यते । अन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नुद्दशे वर्तत इति । (विचिन्त्य निःश्वस्य च अथवा किमत्र दैवमुपालभे । तस्य खल्विदं निर्मर्यादविदुरवचनवीजस्यावधीरितपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढमूलस्य जतुगृहद्यूतविषशाखिनः संभूतचिरकालसंवर्द्धवैरालवालस्य पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति । (अन्यतो विलोक्य) यथाश्चैव विविधरत्नप्रभासंवलितसूर्यकिरणप्रसूतशक्रचापसहस्रसम्पूरितदशदिग्मुखो लूनकेतुवंशो रथो दृश्यते तदहं तमेवाभ्यवपद्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । यावन्निरूपयामि । (उपगम्य दृष्ट्वा निःश्वस्य च) कथमेकादशानामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधनः प्राकृतपुरुष इवादलाघनीयायां भूमावुपविष्टस्तिष्ठति । अथवा तस्य खल्विदं पाञ्चालीकेशग्रहकुसुमस्य फलं परिणमति ।

(उपसृत्य सूत सशया पृच्छति) ।

सूत —(दृष्ट्वा) अये, कथ सग्रामात्सुन्दरक प्राप्त ।

सुन्दरक —(उपगम्य) जयतु जयतु महाराज ।

दुर्योधन —(विलोक्य) अये सुन्दरक, कच्चित्कुशलमद्य राजस्य ।

सुन्दरक —देव कुशल शरीरमात्रकेण ।

दुर्योधन —किं किरीटिनास्य निहता धौरेया क्षत सारथि भग्नो वा रथ ।

सुन्दरक —देव, न भग्नो रथ । अस्य मनोरथ ।

दुर्योधन —किमनिरूपणकथितैराकुलमपि पर्याकुलयसि मे हृद यम् । तदल सम्भ्रमेण । अनेनैतो विरूपण कथ्यताम् ।

सुन्दरक —यद्देव आज्ञापयति । देवस्य मुकुटमणिप्रभावेण पनीता मे रणप्रहारवेदना । (सादोप परिक्रम्य) शृणोतु देव । अस्तीदानी कुमारदु शासनवध (इत्यर्धोक्ते मुख माच्छाद्य शङ्का नाटयति) ।

सूत —सुन्दरक कथय । कथितमेव दैवेन ।

दुर्योधन —कथ्यताम् । श्रुतमस्माभि ।

सुन्दरक —(स्वगतम्) कथ दु शासनवध श्रुतो दैवेन । (प्रकाशम्) शृणोतु देव । अद्य तावत्कुमारद शासन वधामर्षितेन स्वामिनाङ्गराजेन कृतदुर्विलक्षकुन्तीभक्त भीमसेनललाटपट्टेनाविज्ञातसन्धानमोक्षनिर्दिशरधारावर्षि णाभियुक्त स दुराचारो दु शासनवैरी ।

उभौ—ततस्ततः ।

सुन्दरकः—ततो देव, उभयबलमिलद्दीप्यमानकरितुरगपदा-
तिसमुद्भूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च वि-
स्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम् । न खलु गग
नतलं लक्ष्यते ।

उभौ—ततस्ततः ।

सुन्दरकः—ततो देव, दूराकृष्टधनुर्गुणास्फालनटङ्कारेण गम्भी-
रभीषणेन श्रायते गर्जितं प्रलयजलधरेणेति ।

दुर्योधन—ततस्ततः ।

सुन्दरकः—ततो देव, द्वयोरपि तयोरन्योन्यसिंहनादगर्जित-
पिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंगलितज्वलनवि-
स्फुल्लिङ्गटामासुरं गम्भीरस्तनितचापबलध प्रसरच्छरधा-
रासहस्रवर्षि जातं समरदुर्दिनम् ।

दुर्योधनः—ततस्ततः ।

सुन्दरक—ततो देव, एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः परिभव-
शङ्किना धनञ्जयेन वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्र-
स्थितमहावानरस्तुरङ्गमसंवाहनव्यापृतवासुदेवशङ्खचक्रासि-
गदालाञ्छितचतुर्बाहुदण्ड आपूरितपाञ्चजन्यदेवदत्तार-
सितप्रतिरवभरितदशदिगामुखकुहरो. धावितस्तमुद्देशं
रथवरः ।

दुर्योधनः—ततस्ततः ।

सुन्दरक —ततो भीमसेनधनञ्जयाभ्यामभियुक्त पितर प्रेक्ष्य ससम्भ्रममाभुक्तविगलितमवधूय रत्नशीर्षकमाकर्णाकृष्टक ठिनकोदण्डजीवोद्दलितशरपुङ्खविघट्टनत्वरायित सारथिकस्त देशमुपगत कुमारवृषसेनः ।

दुर्योधन—(सावष्टम्भम्) ततस्तत ।

सुन्दरक —ततश्च दव तेनागच्छतैव कुमारवृषसेनेन वैदूर्यशि लाश्यामलस्निग्धशल्यग्रन्थे कठिनपक्षपत्रकृष्णवर्ण कुसुमित इव तरुर्मुहूर्तेन शिलीमुखै प्रच्छादितो धनञ्जयस्य रथवरः ।

उभौ—(सहर्षम्) ततस्तत ।

सुन्दरक —ततो देव, तीक्ष्णचित्तितनिशितभल्लघाणवर्षिणा धनञ्जयेनेषद्विहस्य भणितम्—'अरे रे वृषसेन, पितुरपि तावत्ते न युक्त मम क्षुपितस्याभिमुख स्थातुम् । किं पुनर्मयतो बालस्य । तद्गच्छ । अपरै कुमारै सह गत्वा युध्यस्व ।' एव वाच निशम्य गुरुजनाधिक्षेपोद्दीपितकोपो-परक्तमुखमण्डलविजृम्भितभ्रुकुटिभङ्गभीषणेन चापधारिणा कुमारवृषसेनेन मर्मभेदके पञ्चभिर्मै श्रुतिपथवृत्तप्रणयै निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनै ।

दुर्योधन —साधु वृषसेन, साधु । सुन्दरक ततस्तत ।

सुन्दरक —ततो देव, निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्डगाण्डीवजीवाशब्दनिर्जितवज्रनिर्घातघोरेण बाणनिपतनप्रतिषिद्धदर्शनप्रसरेण प्रस्तुत शिलायलानुरूप किमप्याश्चर्यम् ।

दुर्योधनः—(साकूतम्) ततस्ततः ।

सुन्दरकः—ततो देव, तत्तादृशं प्रेक्ष्य शत्रोः समरव्यापारचातु-
रत्वमविभावितत्रुटितधनुर्गुणगमनागमनशरसन्धानमो-
क्षचटुलकरतलेन कुमारवृषसेनेनापि सविशेषं प्रस्तुतं
समरकर्म ।

दुर्योधनः—ततस्ततः ।

सुन्दरकः—ततो देव, अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्तं-
विश्रान्तिवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलयोः 'साधु
कुमारवृषसेन, साधु' इति कृतचलकलो वीरलोकोऽवलो-
कयितुं प्रवृत्तः ।

दुर्योधनः—(सविस्मयम्) ततस्तत ।

सुन्दरकः—ततश्च देव, अवधीरितसकलराजधानुष्कचक्रपरा-
क्रमशालिनः सुतस्य तथाविधेन समरकर्मारम्भेण हृषीक-
कलणासङ्कटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता
शरपद्धतिर्भीमसेने वाष्पपर्याकुला दृष्टिः कुमार-
वृषसेन ।

दुर्योधनः—(समयम्) ततस्ततः ।

सुन्दरकः—ततश्च देव, उभयबलप्रवृत्तसाधुकारामर्षितेन
भीष्मेणाविना तुरगेषु सारथौ रथवरे धनुषि जीवायां नरेन्द्र-
लाञ्छने सितातपत्रे च व्यापारितः समं शिलीमुखासारः ।

दुर्योधनः—(समयम्) ततस्ततः ।

सुन्दरकः—ततो देव, द्वितीयो लूनगुणश्चोदण्डः परिभ्रमणव्यापा-
रमाश्रमतिपिद्धश्चरसम्पातो भण्डलानि विरचयितुं प्रवृत्तः
कुमारवृषसेनः ।

दुर्योधन—(साशङ्कम्) ततस्ततः ।

सुन्दरकः—ततो देव, सुतरथविध्वंसनामर्पितेन स्वामिनाङ्ग-
राजेनागणितभीमसेनाभियोगेन परिमुक्तो धनञ्जयस्योपरि
शिलीमुखासारः । कुमारोऽपि परिजनोपनीतमन्यं रथमारुह्य
पुनरपि प्रवृत्तो धनञ्जयेन सहायोद्धुम् ।

उभौ—साधु वृषसेन, साधु । ततस्ततः ।

सुन्दरकः—ततो देव, भणितं च कुमारेण 'रे रे तातधिक्षेप-
मुखर मध्यमपाण्डव, मम शरास्तव शरीरमुज्झित्वान्य-
स्मिन्न निपतन्ति' इति भणित्वा शरसहस्रैः पाण्डवशरीरं
प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः ।

दुर्योधनः—(सविस्मयम्) अहो बालस्य पराक्रमो मुग्धस्व-
भावेऽपि । ततस्ततः ।

सुन्दरकः—ततश्च देव, तं शरसम्पातं समवधूय निशितशरा-
भिघातजातमन्युना किरीटिना गृहीतो रथोत्सङ्गात्क्व-
णत्कनत्किङ्किणीजालझङ्कारविराविणी मेघोपरोधविमु-
क्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुर्वी विविधर-
त्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमारा-
भिमुखी ।

दुर्योधनः—(सवेगम्) ततस्ततः ।

सुन्दरक —ततो देव, प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्ग-
राजस्य हस्तात् सशर धनुर्हृदयाद्वीरसुलभ उत्साहो
नयनाद्वाष्पसलिलमपि । रसित च सिंहनाद वृकोदरेण ।
दुष्कर दुष्करमिदमाक्रन्दित कुरुबलेन ।

दुर्योधन —(सचिपादम्) ततस्तत ।

सुन्दरक —ततो देव कुमारवृषसेनेनाकर्णपूरितै निंशित-
क्षुरप्रै सुचिर निध्यायार्धपथ एव भागीरथीवागच्छन्ती
भगवता विषमलोचनेन त्रिधा कृता शक्ति ।

दुर्योधन —साधु वृषसेन, साधु । ततस्तत ।

सुन्दरक —ततश्च देव, एतस्मिन्नन्तरे कलमुखरेण वीरलोक
साधुवादनान्तरित समरतूर्यनिर्घोष । सिद्धचारणगण-
विमुक्तकुसुमप्रकरेण प्रच्छादित समराङ्गणम् । भणित
च स्वामिनाङ्गराजेन 'भो वीर वृकोदर, असमाप्तस्तव
ममापि समरव्यापार । तदनुमन्यस्व मा मुहूर्तम् ।
प्रेक्षावहे तावद्बलस्य तव भ्रातुश्च धनुर्वेदशिक्षाचतुरत्वम् ।
तवाप्येतत्प्रेक्षणीयम्' इति ।

दुर्योधन —ततस्तत ।

सुन्दरक —ततो देव विश्रमितायोधनव्यापारौ मुहूर्तविश्र
मितनिजवैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाङ्गराजौ ।

दुर्योधन —(साभिप्रायम्) ततस्तत ।

सुन्दरक —ततश्च देव, शक्तिखण्डनामर्पितेन गाण्डीविना भणि
तम् 'अरे रे दुर्योधनप्रमुखा (इत्यर्धोक्ते लज्जां नाटयति ।)

दुर्योधन—सुन्दरक, कथ्यताम् । परवचनमेतत् ।

सुन्दरक—शृणोतु देव । 'अरे दुर्योधनप्रमुखा कुरुबलसना-
प्रमख, अविनयनौकर्णधार कर्ण, युष्माभिर्मम परोक्ष
यद्भिर्महारथै परिवृत्यैकाको मम पुत्रकोऽभिमन्युर्व्यापा
दित । अह पुनर्युष्माक प्रलमाणानामेवैत कुमारबृपसन
स्मर्तृयशेष करोमि ।' इति भणित्वा सगर्वमास्फालितमनेन
धनुर्निर्घातघोषभीषणजीवारव गाण्डीवम् । स्वामिनापि
सज्जीकृत फालपृष्ठम् ।

दुर्योधन—(सावहित्थम्) ततस्तत: ।

सुन्दरक—ततश्च देव, प्रतिपिद्धभीमसेनसमरकर्मारम्भेण
गाण्डीविना विरचिते अङ्गराजबृपसेनरथकूलकपे द्वे
धाणनद्या । ताभ्यामपि ताभ्यामन्योन्यदर्शितस्पिद्धाविशेषा-
भ्यामभियुक्त स दुराचारो मध्यमपाण्डव ।

दुर्योधन—ततस्तत ।

सुन्दरक—ततश्च देव, गाण्डीविना तारसितज्यानिर्घोप-
मात्रविस्रातबाणवर्षेण तथाचरित यत्रिभिर्यथा न नभस्तल
न स्वामी न रथो न धरणी न कुमारो न केतुवशो न
बलानि न सारथिर्न तुरङ्गमा न दिशो न वीरलोकश्च
लक्ष्यते ।

दुर्योधन—(सविस्मयम्) ततस्तत ।

सुन्दरक—ततश्च देव, अतिक्रान्ते शरवर्षे क्षणमात्र सम्भिद-
नादे पाण्डवबले विमुक्तक्रन्दे कौरवबले उत्थितो महा
न्कलकलो हा हत कुमारबृपसेनो हा हत इति ।

दुर्योधनः—(सवाष्परोषम्) ततस्तत· ।

सुन्दरक·—ततो देव, पश्यामि कुमारं हतसारथितुरङ्गं द्रुनात-
पत्रकेतुवंशं स्वर्गप्रस्थमिव सुरकुमारमेकेनैव मर्मभेदिना
शिलीमुखेन भिन्नदेहं रथमध्ये पर्यस्तम् ।

दुर्योधनः—(सास्रम्) अहह कुमारवृषसेन । अलमतः परं
श्रुत्वा । हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा गदायुद्ध-
प्रिय, हा राधेयकुलप्ररोह,

पर्याप्तनेत्रमचिरोदितचन्द्रकान्तम्
उद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापहारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्तनयमाननपङ्कजं ते ॥ ८ ॥

सूतः—आयुष्मन्, अलमत्यन्तदुःखावेगेन ।

दुर्योधनः—सूत, पुण्यवन्तो हि दुःखभाजो भवन्ति । अस्माकं

पुनः—

अन्यद्धं हतबन्धूनामेतत्परिभवाग्निना ।
हृदयं दह्यतेऽत्यर्थं क्व तो दुःखं क्व तो व्यथा ॥ ९ ॥

(मोहमुपगतः) ।

सूतः—समाश्वसितु समाश्वसितु महाराजः । (पटान्तेन
वीजयति ।)

दुर्योधनः—(लब्धसंज्ञः) भद्र सुन्दरक, ततो वयस्येन किं
प्रतिपन्नमङ्गराजेन ।

सुन्दरकः—ततश्च देव, तथाविधस्य पुत्रस्य दर्शनेन संगलि-
तमश्रुजलमुज्झित्वानवेक्षितपरप्रहरणाभियोगेन स्वामि-

नामियुक्तो धनञ्जय । तं च सुतवधामर्षोद्दीपितपराक्रमं तथा परिक्रामन्तं प्रेक्ष्य नकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनञ्जयस्य रथवरः ।

दुर्योधन—ततस्ततः ।

मुन्दरकः—ततो देव, शल्येन भणितम्—'अङ्गराज, हततुरङ्गमो भग्नकूबरस्ते रथो न योग्यो भीमार्जुनाभ्यां सहायोऽसुम्' इति परिवर्तितो रथोऽवतारितः स्वामी स्यन्दनाद्बहुप्रकारं च समाश्वासितः । ततश्च स्वामिना सुचिरं विलप्य परिजनोपनीतमन्यं रथं प्रेक्ष्य दीर्घं निःश्वस्य मयि दृष्टिर्विनिक्षिप्ता । मुन्दरक, पहीति भणितं च । ततोऽहमुपगत स्वामिसमीपम् । ततोऽपनीय शीर्षस्थानात्पट्टिकां शरीरसंगलितैः शोणितबिन्दुभिर्लिप्तमुखं घाणं कृत्वाभिलिख्य प्रेषितो देवस्य सन्देश । पट्टिकामर्पयति । (दुर्योधनो गृहीत्वा वाचयति) ।

'स्वस्ति, महाराजदुर्योधनं समराङ्गणात्कर्णं पतदन्तं खण्डे गाढमालिङ्गय विज्ञापयति—

अल्पामविद्यो कृती न समरेष्वस्यास्ति तुल्यः पुमान्
भ्रातृभ्योऽपि ममाधिकोऽयमसुना जेयाः पृथासूनवः ।
यत्सम्भावित इत्यहं न च हतो दुःशासनार्किर्मया
तं दुःखप्रतिकारमेहि भुजयोर्वीर्येण वाप्येण वा ॥ ६ ॥

दुर्योधनः—वयस्य कर्ण, किमिदं भ्रातृशतवधदुःखितं मामप्रेण धाक्यशल्येन घट्टयसि । भद्र मुन्दरक, अथेदानीं किमारब्धोऽङ्गराजः ।

सुन्दरक—देव, अद्याप्यारम्भ पृच्छ्यते । अपनीतशरीरावरण आत्मवधकृतनिश्चय पुनरपि पार्थेन सह समर मार्गयते ।

दुर्योधन—(आवेगादासनादुत्तिष्ठन्) सूत, रथमुपनय ।

सुन्दरक, त्वमपि मद्वचनात्त्वरिततर गत्वा वयस्यमङ्गराज प्रतियोधय । अलमतिसाहसेन । अभिन्न एवायमावयो सङ्कल्प । न खलु भवानेको जीवितपरित्यागाकाङ्क्षी । किंतु—

हत्वा पार्थान्सलिलमथिव बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्प सह कतिपयैर्मन्त्रिभिश्चारिभिश्च ।
कृत्वान्योन्य सुचिरमपुनर्भावि गाढोपगूढ
सत्यद्याहो हततनुमिमा द्रक्षिता निर्वृतोऽहम् ॥१०॥

अथवा शाक प्रति मया न किञ्चित्सन्दष्टव्यम् ।

वृषसेनो न ते पुत्रो न मे दु शासनोऽनुज ।
त्वा बोधयामि किमह त्व मा सस्थापयिष्यसि ॥११॥

सुन्दरक—यदेव आज्ञापयति । (निष्क्रान्त) ।

दुर्योधन—त्वरितमेव रथमुपस्थापय ।

सूत—(श्रुत्वा) देव, हयासवलितो नेमिध्वनि श्रूयते ।

तथा तर्कयामि नून परिजनोपनीतो रथ ।

दुर्योधन—सूत, गच्छ त्व सज्जीकुरु ।

सूत—यदाज्ञापयति देव । (निष्क्रम्य पुन प्रविशति) ।

दुर्योधन—(विलोक्य) किमिति नारूढोऽसि ।

सूत—एष खलु तातोऽस्मा च सञ्जयाधिष्ठित रथमादाय देवस्य समीपमुपगतो ।

दुर्योधनः—किं नाम तातोऽम्बा च सम्प्राप्तौ । कष्टमतियोग-
त्समाचरितं दैवेन । सूत, गच्छ त्वं स्यन्दनं तूर्णमुपहर ।
अहमपि तातदर्शनं परिहरन्नेकान्ते तिष्ठामि ।

सूत —देव, त्वदेकशेषबान्धवावेतौ कथमिव न समाश्वासयसि ।

दुर्योधन —सूत, कथमिव समाश्वासयामि विमुक्तभाग्यधेयः ।
पश्य ।

अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा
भ्रातस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च ।
तस्मिन्काले प्रसभमरिणा प्रापिते तामवस्थां
पार्श्वं पित्रोरपगतघृणः किं नु यदयामि गत्वा ॥ १२ ॥
तथाप्यवश्य वन्दनीयौ गुरू । (निष्क्रान्त सूतः ।)

(तत प्रविशति रथयानेन गान्धारी सञ्जयो धृतराष्ट्रश्च ।)

धृतराष्ट्रः—वत्स सञ्जय, कथय कथय कस्मिन्नुद्देशे कुरुकुल-
काननैकशेषप्रवालो वत्सो मे दुर्योधनस्तिष्ठति । कच्चि-
ज्जीवति वा न वा ।

गान्धारी—जात, यदि सत्यं जीवति मे वत्सस्तत्कथय कस्मि-
न्देशे वर्तते ।

सञ्जय —अन्येष महाराज एक एव न्यग्रोधच्छायायामुपविष्ट-
स्तिष्ठति ।

गान्धारी—(सकरुणम्) जात, एकाकीति भणसि किं नु
खलु साम्प्रतं भ्रातृशतमस्य पार्श्वे भविष्यति ।

सञ्जयः—तात श्रम्य, अवतरतं स्वैरं रथात् । (उभाववतरणं नाटयतः ।)

सञ्जयः—(उपसृत्य) विजयतां महाराजः । नन्वेष तातोऽम्बया सह प्रातः किं न पश्यति महाराजः । (दुर्योधनो वैलक्ष्यं नाटयति ।)

धृतराष्ट्र—शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
वद्धेषु व्रणपट्टकेषु शनकै कर्णे कृतोपाश्रयः ।
दूरान्निर्जितशात्रवान्नरपतीनालोक्य लीलया
सद्यः पुत्रक वेदनेति न मया पापेन पृष्टो भवान् ॥१३॥

(धृतराष्ट्रो गान्धारीं च सगैनोपेत्यालिङ्गतः ।)

गान्धारी—वत्स, अतिगाढप्रहारवेदनापर्याकुलस्यास्मासु सन्निहितेष्वपि न प्रसरति ते वाणी ।

धृतराष्ट्रः—वत्स दुर्योधन, किमकृतपूर्वं सम्प्रति मय्यप्ययमव्याहारः ।

गान्धारी—वत्स, यदि त्वमप्यस्मान्नालपसि तत्किं साम्प्रतं वत्सो दुःशासन श्रालपत्यथ दुर्मर्षणो वान्यो वा ।
(रोदिति ।)

दुर्योधनः—जातोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य वाष्पपयसां तव चाम्ब हेतुः ।
दुर्जातमत्र विमले भरतान्वये व.
किं मां सुतक्षयकरं सुत इत्यवैषि ॥ १४ ॥

गान्धारी—जात, अल परिदेवितेन । त्वमपि तावदेकोऽस्या-
न्ययुगलस्य मार्गोपदेशक । तत्थिर जाव । किं मे राज्येन
जयेन वा ।

दुर्योधन —मात किमप्यसद्दश कृपण घचस्ते
सुहत्तिया क्व भवती क्व च दीनतैषा ।
निर्वंस्सले सुतशतस्य विपत्तिमेतां
त्व नानुचिन्तयसि रत्तसि मामयोग्यम् ॥ १५ ॥

नून विचेष्टितमिद सुतशोकस्य ।

सञ्जय —महाराज, किं थाय लोकवादो चितथ 'न घटस्य
कूपपतने रज्जुस्तनैव प्रदेतव्या' इति ।

दुर्योधन —अपुष्कलमिदम् । उपनियमाणाभावे किमुपकरणेन ।
(रोदिति ।)

धृतराष्ट्र —(दुर्योधन परिष्वज्य) वत्स समाश्वसिहि । समा-
श्वासय चास्मानिमामतिदीना मातर च ।

दुर्योधन —तात, दुर्लभ समाश्वास इदानीं युष्माकम् ।
किन्तु—
क्षुत्या सह युवामद्य मया निहतपुत्रया ।
विराजमानौ लोकेऽपि तनयाननुशोचतम् ॥ १६ ॥

गान्धारी—जात, एतदेव साम्प्रत प्रभूत यत्त्वमपि तावदेको
नानुशोचितव्य । तज्जात, प्रसीद । एष ते शोकाञ्जलि ।
निवर्त्यता समरव्यापारात् । अपश्चिमं कुरु पितुर्वचनम् ।

धृतराष्ट्रः—वत्स, शृणु वचनं तवाम्बाया मम च निहता-
शेषबन्धुवर्गस्य । पश्य ।
दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमप्रतः शमयतो भीतं जगत्फाल्गुनात् ।
वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिपु मुञ्च तात पितरावन्धाविमौ पालय ॥ १७ ॥

दुर्योधनः—समरात्प्रतिनिवृत्य किं मया कर्तव्यम् ।

गान्धारी—जात, यत्पिता ते विदुरो वा भणति ।

सञ्जयः—राजन्, एवमिदम् ।

दुर्योधनः—सञ्जय, अद्याप्युपदेष्टव्यमस्ति ।

सञ्जयः—राजन्, यावत्प्राणिति तावदुपदेष्टव्यभूमिर्विजिगीषुः
प्रज्ञावताम् ।

दुर्योधनः—(सक्रोधम्) शृणुमस्तावद्भवत एव प्रज्ञावतो-
ऽस्मान् प्रति प्रतिरूपमुपदेशम् ।

धृतराष्ट्रः—वत्स, युक्तवादिनि सञ्जये किमत्र क्रोधेन । यदि
प्रकृतिमापद्यते तदहमेव भवन्तं ब्रवीमि । श्रूयताम् ।

दुर्योधनः—कथयतु तातः ।

धृतराष्ट्रः—वत्स, किं विस्तरेण । सन्धत्तां भवानिदानीमपि
युधिष्ठिरमीप्सितपणबन्धेन ।

दुर्योधनः—तात, तनयस्नेहवैक्लव्यादम्बा बालिशत्वात्सञ्ज-
यश्च कामभेवं ब्रवीतु । युष्माकमप्येवं व्यामोहः । अथवा
भ्रमवति पुत्रनाशजन्मा हृदयज्वरः । अन्यच्च । तात,

अस्यखिलस्यालंशतस्यदावधीरितवासुदेवसामोपन्यासः स-
म्प्रति द्रुपदपितामहाचार्यानुजराजचक्रविपत्ति स्वयंवी-
रमाल्यस्नेहादुदात्तपुरुषव्रीडावहमसुखावसानं च कथ-
मिव करिष्यति दुर्योधनः सह पाण्डवैः सन्धिम् । अन्यच्च
नयवेदिन्सञ्जय,

हीयमाना किल रिपोर्नृपाः स्वन्द्धते परान् ।
दुःशासने हतेऽहीनाः सानुजे पाण्डवाः कथम् ॥ १८ ॥

धृतराष्ट्रः—वत्स, एवं गतेऽपि मत्प्रार्थनया न किञ्चिन्न करोति
युधिष्ठिरः ।

दुर्योधनः—कथमिव ।

धृतराष्ट्रः—वत्स, श्रूयतां प्रतिज्ञा युधिष्ठिरस्य । नाहमेकस्यापि
भ्रातुर्विपत्तौ प्राणान्धारयामीति । यद्भुच्छलत्वात्संग्राम-
स्यानुजनाशमाशङ्कमानो यदैव भवते रोचते तदैवासौ सज्जः
सन्धातुम् ।

सञ्जयः—एवमिदम् ।

गान्धारी—जात, उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम् ।

दुर्योधनः—तात, अम्ब, सञ्जय,

एकेनापि विनानुजेन मरणं पार्थं प्रतिज्ञातवान्
भ्रातॄणां निहते शते विपहते दुर्योधनो जीवितुम् ।
तं दुःशासनशोणितास्रनमरिं भिन्नं गदाकोटिभि-
र्भीमं दिक्षु न विक्षिपामि कृपणः सन्धिं विधास्यामहम् ॥

गान्धारी—हा जात दुश्शासन, हा मद्भद्रदुर्ललित, हा युवराज,
अश्रुतपूर्वं खलु कस्यापि लोके ईदृशी विपत्तिः । हा
वीरप्रसविनी हतगान्धारी दुःखशतं प्रसूता न पुनः
सुतशतम् । (सर्वे रुदन्ति ।)

सञ्जयः—(बाष्पमुत्सृज्य) तात, अम्ब, प्रतिबोधयितुं महा-
राजमिमां भूमिं युवामागतौ । तदाज्ञापि तावत्संलभ्यताम् ।

धृतराष्ट्रः—वत्स दुर्योधन, पञ्च विमुखेषु भागधेयेषु त्वयि
चामुच्चति मानधन्यमपि त्यक्तकोपजीविनालम्बनेयं
तपस्विनी गान्धारी कमवलम्बतां शरणमद्य च ।

दुर्योधनः—श्रूयतां यन्निपतितुमिदानीं प्राप्तकालम् ।

कलिनभुवना मुक्तैश्वर्यांस्तिरस्कृतविद्विषः
प्रणतशिरसां राज्ञां चूडासहस्रकृतार्चनाः ।
अभिमुखमरीन्भ्रान्तः संख्ये हताः शतमात्मजा
वहतु सगरेणोढां तातो धुरं सहितोऽन्वया ॥ २० ॥
विपर्यये त्वस्याधिपतेरुच्छ्रितः क्षात्रधर्मः स्यात् ।

(नेपथ्ये महान्कलकलः ।)

गान्धारी—(आकर्ण्य सभयम्) जात, कुतैवद् हाहाकारमिश्रं
तूर्यघोषितं श्रूयते ।

सञ्जयः—अम्ब, भूमिरियमेवंविधानां भीरुजननाऽऽजननी
महानिनादानाम् ।

धृतराष्ट्रः—वत्स सञ्जय, क्षयवातमतिभैरवः खलु विस्तारी
हाहारवः । कारणेनास्य महता भवितव्यम् ।

दुर्योधनः—तात, प्रसीद । पराङ्मुखं खलु दैवमस्माकम् ।
यावदपरमपि किंचिदत्याहितं न धाक्यति तावदेवास्मापय
मां संग्रामावतरणाय ।

गान्धारी—जात, मुहूर्तं तावन्मां मन्दभाग्यां समाश्वासय ।

धृतराष्ट्रः—वत्स, यद्यपि भवान्समराय कृतनिश्चयस्तथापि
रहः परप्रलोघातोपायश्चिन्त्यताम् ।

दुर्योधनः—प्रत्यक्ष हतयान्धया मम परे हन्तुं न योग्या रहः
किं वा तेन कृतेन तैरपि कृतं यन्न प्रकाशं रणे ।

गान्धारी—जात, एकाकी त्वम् । कस्ते साहाय्यं करिष्यति ।

दुर्योधनः—एवोऽहं भवतीसुतत्रयकरो मातः कियन्तोऽरयः
साम्यं केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी ।

(नेपथ्ये कलकलानन्तरम् ।)

भो भो योधा, निवेदयन्तु भवन्तः कौरवेश्वराय, इदं
महत्कदनं प्रवृत्तम् । अलमप्रियश्रवणपराङ्मुखतया । यत
कालानुरूपं प्रतिविधानन्यमिदानीम् ।

तथा हि ।

त्यक्तभाजनरश्मिरङ्कितततुः पार्श्वाङ्कितैर्मार्गणै-
र्वाहैः स्यन्दनवर्त्मनां परिचयादाक्रम्यमाण शनै ।
घातांमङ्कपतेर्विलोकनजलैरावेदयन्मृच्युतां
शून्येनैव रथेन याति शिविरं शल्य. कुरुश्शल्यवत् ॥२२॥

दुर्योधनः—(श्रुत्वा साशङ्कम्) आः केनेदमविस्पष्टमशनि-
पातदारुणमुद्घोषितम् । कः कोऽत्र भोः ।

(प्रविश्य सन्त्रान्तः) सूतः—हा, हताः स्मः । (आत्मानं पातयति)।

दुर्योधनः—अयि, कथय ।

धृतराष्ट्रसङ्घौ—कथयतां कथयताम् ।

सूत—आयुष्मन्, निगद्यताम् ।

शल्येन यथा शल्येन मूर्च्छितः प्रविशता जनौघोऽयम् ।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥ २३ ॥

दुर्योधनः—हा धिगस्तु कर्णं । (मोहमुपागत ।)

गान्धारी—जात, समाश्वसिहि, समाश्वसिहि ।

सञ्जयः—समाश्वसितु समाश्वसितु महाराजः ।

धृतराष्ट्रः—मोः, कष्टं कष्टम् ।

मोक्षे द्रोणे च निहते य आसीद्बलक्षयः ।
यस्यास्य मे मुहुर्दूतो राज्ञयः सोऽभ्यगं हतः ॥ २४ ॥

वत्स, समाश्वसिहि समाश्वसिहि । ननु मौ हतविधे,

अन्योऽनुभूतशतपुत्रविपद्विदुःखः
शोच्यां दशामुपगतः सह भार्ययाहम् ।
अस्मिन्नयोगिनमुहद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि हते भवता निराशः ॥ २५ ॥

वत्स दुर्योधन, समाश्वसिहि समाश्वसिहि । समाश्वासय तपस्विनीं मातरं च ।

दुर्योधनः—(लब्धसंज्ञः)

अयि कर्ण कर्णसुखदां श्रयच्छ मे
गिरमुद्विरन्निव मुदं मयि स्थिराम् ।
सततावियुक्तमकृताप्रियं कथं
व्यसनवत्सल विहाय यासि माम् ॥ २६ ॥
(पुनर्मोहमुपागत । सर्वं समाश्वासयन्ति ।)

दुर्योधन.—मम प्राणाधिके तस्मिन्कर्णनामधिपे हते ।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात का कथा ॥ २७ ॥

अपि च ।

शोचामि शोच्यमपि शत्रुहतं न वत्सं
दुःशासनं तमधुना न च बन्धुवर्गम् ।
येनातिदुःश्रवमसाधु हतं तु कर्णं
कर्णस्य तस्य निधने निधनं कुलस्य ॥ २८ ॥

गान्धारी—जात, शिथिलय तावत् क्षणमात्रं बाष्पमोक्षम् ।
धृतराष्ट्रः—वत्स, क्षणमात्रं परिमार्जयाश्रूणि ।
दुर्योधनः—मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारितः ।
तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्यते ॥ २९ ॥

सूत, कथमेतदसम्भवनीयमसत्कुलान्तकरणं कर्म कृतं स्यात् ।

सूत—आयुष्मन्, एवं किल जनः कथयति—

भूमौ निमग्नचक्रश्चकायुधसारथेः शरैस्तस्य ।
निहतः किलेन्द्रसूनोरस्त्रसेनाकृतान्तस्य ॥ ३० ॥

दुर्योधन.—कर्णाननेन्दुसरणात् क्षुभित. शोकसागरः ।
वाडवेनेव शिखिना पीयते क्रोधजेन मे ॥ ३१ ॥

तात, अम्ब, प्रसीदतम् ।

ज्वलन. शोकजन्मा मामयं दहति दुःसहः ।
समानायां विपत्तौ मे वरं संशयितं रणे ॥ ३२ ॥

धृतराष्ट्रः—(दुर्योधनं परिष्वज्य रुदन्)
भवति तनय लक्ष्मीः साहसेष्वीदृशेषु
द्रवति च हृदयं मे भीमसुत्रेक्ष्य भीमम् ।
अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड
च्चलबहुलमरीणां सङ्करे हा हतोऽसि ॥ ३३ ॥

गान्धारी—जात, तेनैव सुतदुष्कृतान्तेन वृकोदरेण सम समर
मार्गयसे ।

दुर्योधनः—तिष्ठतु तावद् वृकोदरः ।
पापेन येन हृदयस्य मनोरथो मे
सर्वाङ्गचन्दनरसो नयनामृतेन्दुः ।
पुत्रस्त्वाद्य तव तात नयैकशिष्यः
कर्णो हतः सपदि तन्न शरीः पतन्तु ॥ ३४ ॥

सूत, अलमिदानीं कालातिपातेन । सज्जं मे रथमुपाहर ।
भयं चेत्पाण्डवेभ्यस्तिष्ठ । गदामात्रसहाय एव समरभु-
वमवतरामि ।

सूतः—अलमन्यया सम्भावितेन । अयमहमागत एव । (नि-
ष्क्रान्तः ।)

धृतराष्ट्रः—वत्स दुर्योधन, यदि स्थिर एवास्यादृग्विधमयं ते व्यव-
सायस्तत्सन्निहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम् ।

दुर्योधनः—तथाभिषिक्त एव ।

गान्धारी—जात, कतरः पुनः स यस्मिन्नाशामवलम्बयिष्ये ।

धृतराष्ट्रः—किं वा शल्य उत वाश्वत्थामा ।

दुर्योधन.—

कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा ।
अनिवारितसम्पातैरयमात्माश्रुवारिभिः ॥ ३६ ॥

(प्रविश्य सम्भ्रान्तः) सूतः—आयुष्मन्,

भ्रातावेकरथारूढौ पृष्ठ्यन्तौ त्वामितस्ततः ।

सर्वे—कथ्य कथ्य ।

सूतः—स कर्णारि स च क्रूरो वृकोदरः ॥ ३७ ॥

गान्धारी—(सभयम्) जात, किमत्र प्रतिपत्तव्यम् ।

दुर्योधन —ननु सन्निहितैवेय गदा ।

गान्धारी—हा हतास्मि मन्दभागिनी ।

दुर्योधनः—अम्ब, अलमिदानीं कार्पण्येन । सञ्जय, रथमा
रोप्य पितरौ शिबिरं प्रतिनय । समागतोऽस्माकं
शोकापनोदी जन ।

धृतराष्ट्रः—वत्स, क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलभे ।

दुर्योधन.—तात, किमनेनोपलम्भेन ।

(तत प्रविशतो भीमार्जुनौ ।)

भीमः—भो भो सुयोधनानुजीविनः, किमिति सम्भ्रमादय-
थायथं चरन्ति भवन्तः । कथयत तावदिदमावयोराग-
मनं स्वामिनस्तस्य कुरुपतेः ।

दुर्योधन —सूत, कथय गत्वोभयोरयं तिष्ठतीति ।

सूतः—यथाज्ञापयति देवः । (तावुपसृत्य) ननु भो वृकोदरार्जुनौ, एष महाराजस्तातेनास्वया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

अर्जुन—आर्य, प्रसीद । न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेन भूयमुद्वेजयितुम् । तद् गच्छावः ।

भीमः—मूढ, अनुल्लङ्घनीयः समुदाचारः । न युक्तमनभिवाद्य गुरूनागन्तुम् । (उपसृत्य) सञ्जय, पित्रोर्नमस्कृतिं श्रावय । अथवा तिष्ठ । स्वयं विधाय नामकर्मणी वन्दनीया गुरवः ।

अर्जुन—(उपगम्य) तात, अम्ब,

सकलरिपुजयाप्ता यत्र यद्वा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम् ॥३८॥

भीमः—चूर्णितोरोर्वकौरव्य क्षीवो दुःशासनासृजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाश्रति ॥३९॥

धृतराष्ट्रः—दुरात्मन् वृकोदर, न खल्विदं भवतैव केवलं सपत्नानामपकृतम् । यावद् ज्ञातं तावत्समरविजयिनो जिता हताश्च वीराः । तत्किमेवं विकत्थनाभिरस्मानुद्वेजयसि ।

भीमः—तात, अलं मन्युना ।

(नेपथ्ये)—भो भो भीमसेनार्जुनौ, एष खलु श्रीमानजातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति ।

उभौ—किमाज्ञापयत्यार्यः ।

(पुनर्नेपथ्ये)—

कुर्यन्त्रासा हतानां रणशिरसि नृणां वह्निसाहेद्धमाप-
मभ्रूभिश्रं कषञ्चिद्दहतु जलमयी वान्धवा वान्यवेभ्यः ।
मार्गन्तां ज्ञातिदेहान्हतनरगहने खण्डितान्गृध्रकङ्कै-
रस्त्र भास्त्रान्प्रपात. सह रिपुभिरय सह्रियन्तां यवानि ॥

उभौ—यदाज्ञापयत्यार्यः । (निष्क्रान्तौ)

(नेपथ्ये —अरे रे गाण्डीवाकर्षणपटुभुजालिङ्ग, अर्जुन अर्जुन,

क्वेदानीं गम्यते ।

कर्णक्रोधेन युष्मद्विजयि धनुरिद त्यक्तमेतान्यहानि
प्रौढ विक्रान्तमासीद्विन इव भवता शून्यशून्ये रणेऽस्मिन् ।
स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनयजिनन्यस्तहेतेरपेतः
कल्पाग्नि. पाण्डवाना द्रुपदसुतचमूवस्मरो द्रौणिरस्मि ॥

धृतराष्ट्रः—(आकर्ण्य सहर्षम्) वत्स दुर्योधन, द्रोणवधपरिभ
वोद्दीपितक्रोधपावकः पितुरपि समधिकबलः शिक्षावान-
मरोपमश्चायमश्वत्थामा प्राप्त. । तत्प्रत्युपगमनेन तावद्य
सम्भाव्यतां वीर ।

गान्धारी—जात, प्रत्युद्गच्छेन महाभागम् ।

दुर्योधन —तात, अम्ब, किमनेनाद्धराजन्यधाशसिना वृथायो
धनशस्त्रबलभरेण ।

धृतराष्ट्रः—वत्स, न खल्वस्मिन् काले पराक्रमवतामेवंविधानां
वाङ्मात्रेणापि विरागमुत्पादयितुमर्हसि ।

(अवलोक्य) अश्वत्थामा—विजयतां कौरवाधिपति. ।

दुर्योधनः—(उत्थाय) गुरुपुत्र, इत आस्यताम् । (उपवेशयति ।)

अश्वत्थामा—राजन्दुर्योधन,

कर्णेन कर्णसुभगं बहु यत्तदुक्तं
यत्सङ्करेषु विहितं विदितं त्वया तत् ।
द्यौरिव्यधिज्यधनुरापतितोऽभ्यमित्र-
मेषोऽधुना त्यज नृप प्रतिकारचिन्ताम् ॥४२॥

दुर्योधनः—(साभ्यसूयम्) आचार्यपुत्र,

अवसानेऽङ्गराजस्य योद्धव्यं भवता किल ।
ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः ॥४३॥

अश्वत्थामा—(स्वगतम्) कथमद्यापि स एव कर्णपक्षपातः । अस्मासु च परिभवः । (प्रकाशम्) राजन्कौरवेश्वर, एवं भवतु । (निष्क्रान्तः ।)

धृतराष्ट्रः—वत्स, क एष ते व्यामोहो यदस्मिन्नपि काले एवंविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापराग्मुखत्वादसि ।

दुर्योधन—किमस्याप्रियमनृतं च मयोक्तम् । किं वा नेदं क्रोधस्थानम् । पश्य ।

अस्खलितमहिमानं क्षत्रियैरात्तचापैः
समरशिरसि युष्मद्भाग्यदोषाद्विपन्नम् ।
परिवदति समस्तं मित्रमङ्गाधिराजं
मम खलु कथयास्मिन्को विशेषोऽस्ति नेति वा ॥४४॥

धृतराष्ट्रः—वत्स, तवापि कोऽत्र दोषः । अघसानमिदानीं
भरतकुलस्य । सञ्जय, किमिदानीं करोमि मन्दभाग्यः ।
(विचिन्त्य) भवत्वेवं तावत् । सञ्जय, मद्वचनाद्रु ब्रूहि
भारद्वाजमभ्यत्यामानम् ।

स्मरति न भवान्पीत स्तन्य विभज्य महामुना
मम च मृदितं क्षौमं बाल्ये त्वदङ्गविचर्तनैः ।
अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यदु
वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया ॥४५॥

सञ्जयः—यदाज्ञापयति तात । (उत्तिष्ठति ।)

धृतराष्ट्रः—अपि चेदमन्यस्त्वया वक्तव्यम् ।

यन्मोचितस्तव पिता वितथेन शस्त्रं
यत्तादृशः परिभवः स तथाविधोऽभूत् ।
एतच्चिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपहाय विधास्यसीति ॥४६॥

सञ्जयः—यदाज्ञापयति तातः । (निष्क्रान्त ।)

दुर्योधनः—सूत, सांग्रामिकं मे रथमुपकल्पय ।

सूतः—यदाज्ञापयत्यायुष्मान् । (निष्क्रान्तः ।)

धृतराष्ट्रः—गान्धारि, इतो वयं मद्राधिपते शल्यस्य शिविरमेव
गच्छाम । वत्स, त्वमप्येवं कुरु ।

(परिक्रम्य निष्क्रान्ताः सर्वे ।)

विश्रुतचरितम् ।

देव, मयापि परिभ्रमता विन्ध्याटव्यां कोपि कुमारः क्षुधा तृषा च क्लिश्यन्क्लेशार्हः क्वचित् कूपाभ्याशेऽथ्वर्पदेशीयो दृष्टः । स च मामगद्गदमगदत्—'महाभाग, क्लिष्टस्य मे क्रियतामार्य साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चनिह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः । वलतमलि नाहमुद्धर्तुम्' इति । अथाहमभ्येत्य व्रतत्या कयापि वृढमुत्तार्य, तं च बालं वंशनालीमुखोद्भूताभिपद्भिः फलैश्च पल्लवैः शरदेपोच्छ्वसस्य लकुचवृक्षस्य शिखरात् पाषाणपात्रितैः प्रत्यानीतप्राणवृत्तिमापाद्य,तत्तलनिषण्णस्तं जन्तमप्रच्छम्-'तात, क एष बालः, को वा भवान्, कथं चेयमापदापन्ना' इति । सोऽश्रुगद्गदमगदत्—'शृणुतां महाभाग—

विदर्भो नाम जनपदः । तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः,' सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रक्षितभृत्यः, कीर्तिमान्, उद्यमो मूर्तिबुद्धिर्भ्याम्, उत्थानशीलः, शास्त्रप्रमाणकः, शरणमभ्यर्थनारम्भी, सम्भावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असभ्यप्रलापेष्वदत्तकर्णः, कदाचिदप्यवितृप्तो गुरुषु, अतिनदीष्णः कलासु, नेदिष्ठो धर्मार्थसंहितासु, स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्ता, प्रत्यवेक्षिता

कोपघाहनयो, यत्नेन परीक्षिता सर्वाध्यक्षाणाम्, उत्साहयिता कृतकर्मणामनुरूपेदानमानै, सद्यः प्रतिकर्ता दैवमानुषीणामापदाम्, पाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य, पुण्यश्लोक पुण्यधर्मा नाम राजासीत् । स पुण्यै कर्मभिः आएय पुरुषायुषम् पुनरपुण्येन प्रजानामगण्यतामरेषु । तदनन्तरमनन्तधर्मा नाम तदायतिरवनिमध्यतिष्ठत् । स सर्वगुणै. समृद्धोऽपि दैवादण्डनीत्यां नात्याहृतोऽभूत् । तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्ध. पितुरस्य बहुमतः प्रगल्भयागमापत— 'तात, सर्वैवात्मसम्पद्भिजनात्प्रभृत्यन्यूनैवाश्रयति लक्ष्यते । बुद्धिश्च निसर्गपटुर्बलासु नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राग्निसारा तवेतरेभ्यः प्रतिविशिष्यते । तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु, अनभिज्ञोधितेव हेमजाति र्नातिभाति बुद्धिः । बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते । न च शक्तः साध्य साधनं वा विभज्य वक्तुम् । अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते । न चावेक्षानस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय । अतिक्रान्तशासनाश्च प्रजा यदिच्छन्नवादिन्यो यथाकथञ्चिद्वर्तिन्यः सर्वा स्थिती सद्विषेयु. । निर्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानं च भ्रंशयते । आगमदीपदृष्टेन खलक्ष्यना सुखेन वर्तते लोकयात्रा । दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति । तेन हीन. सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात् । अतो विहाय बाह्यविद्यास्वभि-

षङ्गभागमय दण्डनीतिं कुलविद्याम्। तदर्थानुष्ठानेन चायर्जितश-
किसिन्धिरस्खलितशासन शाधि चिरमुदधिमेखलामुर्वीम्' इति।

एतदाकर्ण्य 'स्थान एव गुरुभिरनुशिष्टम्। तथा क्रियते' इत्यन्तःपुरमविशत्। तां च वार्तां पार्थिवेन प्रमदासन्निधौ प्रसङ्गेनोदीरितामुपनिशम्य समीपोपविष्टश्चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्यवाद्यादिष्वबाह्यः पटुरयन्त्रितमुखो बहुभङ्गिविशारदः परमर्मान्वेषणपर परिहासयिता परिवाद-रुचिः पैशुन्यपण्डित सचिवमण्डलादव्युत्कोचहारी सकल-दुर्नयोपाध्यायः कुमारसेवको विहारभट्टो नाम स्मितपूर्वं व्यज्ञापयत्—'देव, दैवानुग्रहेण यदि कश्चिद्राजनं भवति विभूतेः, तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः। तथाहि—केचित् प्रेत्य किल लभ्यैरभ्युदया-तिशयैरात्मानमुत्पाद्य, मुण्डयित्वा शिरः, वल्कैर्दर्भरज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनोपलिप्य, अनशनं च शाययित्वा सर्वस्वं स्वीकुर्वन्ति। तेभ्योऽपि घोरतपाः पाषण्डिनः पुत्रदार-शरीरजीवितान्यपि मोचयन्ति। यदि कश्चित् पटुजातीयो नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमिच्छेत् तमन्ये परिवार्याहुः—'एकामपि कार्षिणीं कार्षापणलक्षमापादयेम, शस्त्राद्ते सर्व-शत्रून् घातयेम, एकशरीरिणमपि मर्त्यं चक्रयातनं विदधीमहि, यद्यस्मदुद्दिष्टेन मार्गेणाचरति' इति। स पुनरिमान् प्रत्याह—'कोऽयं मार्गः' इति। पुनरिमे ब्रुवते—'नन्वयं त्रयी वार्तान्वीक्षिकी, दण्डनीतिरिति। तासु तिसृष्वपीवार्ता-न्वीक्षिक्यो महत्यो मन्दफलाश्च। तास्तावदास्ताम्। अधीष्व

तायद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थं षड्भिः श्लोकसहस्रैः संहिता । सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा' इति । स 'तथा' इत्यधीते शृणोति च । तथैव जरां गच्छति ।

तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि । सर्वमेव वाङ्मय-मविदित्वा न तत्त्वतोऽधिगम्यते । भवतु कालेन बहुना-यासेन वा तदर्थाधिगतिः । अधिगतशास्त्रेण चादावेव पुत्रदा-रमपि न विश्वास्यम् । आत्मनुद्वेरपि हृते तण्डुलैरियद्भि-रियानोदन सम्पद्यते । इयत ओदनस्य पाकायेनावदिग्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम् । उत्थितेन च राज्ञा क्षालिताक्षालिते मुखे मुष्टिमर्धमुष्टिं वाभ्यन्तरीकृत्य कृतक्षमा-यव्ययजातमद्य प्रथमेऽष्टमे भागे श्रोतव्यम् । शृण्वत एवास्य द्विगुणमपहरन्ति तेऽप्यद्भुतांश्चत्वारिंशत चाणक्योपदिष्टाना-हरणोपायान् सहस्रशातमुद्भावेव ते विकल्पयितार । द्वितीयेऽ-न्योन्य विवदमानानां प्रजानामानीयाहृतमानकर्णः कर्णं जीवति । तत्रापि भाड्विवाकादय स्वेच्छया जयपराजयौ विदधाना पापेनार्कीर्त्या च भर्तारमात्मनश्चार्थेर्योजयन्ति । तृतीये स्नातुं भोक्तु च लभते । भुक्तस्य च यावदन्धःपरिणाम-स्तावदस्य विषभयं न शाम्यत्येव । चतुर्थे हिरण्यप्रतिग्रहाय हस्त प्रसारयन्नेवोत्तिष्ठति । पञ्चमे मन्त्रचिन्तया महान्तमाया-समनुभवति । तत्रापि मन्त्रिणो मध्यस्था इवान्योन्यं मिथ सम्भूय, दोषगुणौ दूतचारवानयानि शक्यशक्यतां देशकाल-कार्यविस्याश्च विपरिवर्तयन्त. स्वपरमित्रमण्डलान्युपजीवन्ति ।

बाह्याभ्यन्तरांश्च कोपान् गूढमुत्पाद्य प्रकाशं प्रशमयन्त इव स्वामिनमवशमवगृह्णन्ति । षष्ठे स्वैरविहारो मन्त्रो वा सेव्यः । सोऽस्यैतावान् स्वैरविहारकालो यस्य तिस्रश्चिपादोत्तरा नाडिकाः । सप्तमे चतुरङ्गबलप्रत्यवेक्षणप्रयासः । अष्टमेऽस्य सेनापतिसख्यस्य विक्रमचिन्ताक्लेशः । पुनरुपास्यैव सन्ध्याम्, प्रथमे रात्रिभागे गूढपुरुषा द्रष्टव्या । तन्मुखेन चानिशंसाः शस्त्राग्निरसप्रयोगा अनुष्ठेयाः । द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्यायमारभते । तृतीये तूर्यघोषेण संविशेच्चतुर्थपञ्चमौ शयीत किल । कथमिवास्याजस्रचिन्तायासविह्वलमनसो वराकस्य निद्रासुखमुपनमेत् । पुनः षष्ठे शास्त्रचिन्ताकार्यचिन्तात्मनः । सप्तमे च मन्त्रग्रहा दूताभिप्रेषणानि च । दूताश्च नामोभयत्र प्रियाख्यानलब्धानर्थान् दीनगुल्कवाक्यकर्मनि चाशिष्यया वर्धयन्तः, कार्यमविद्यमानमपि छृतेनोत्पाद्यानवरतं भ्रमन्ति । अष्टमे पुरोहितादयोऽभ्येत्यैनमाहु —'अद्य दृष्टो दुःस्वप्नः । दुःस्था ग्रहाः । शकुनानि चाशुभानि । शान्तयः क्रियन्ताम् । सर्वमस्तु सौवर्णमेव होमसाधनम् । एवं सति कर्म गुणवद्भवति । अल्पकल्पा इमे आलस्याः । कृतमेभिः स्वस्त्ययनं कल्याणतरं भवति । ते चामी कण्टकाद्रिद्या बह्वपत्या यज्वानो वीर्यवन्तश्चाद्याप्यमानप्रतिग्रहा । दत्तं चैभ्यः स्वर्ग्यमायुष्यमरिष्टनाशनं च भवति' इति बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति । तदेवमहर्निशमविहितसुखलेशमायासबहुलमविरलक्लेशं च नयता नयज्ञस्यास्य चक्रवर्तिना स्व-

मण्डलमात्रमपि दुरुत्सृज्य भवेत् । शास्त्रसमाम्नातो हि यद्-
दाति यन्नानयति यत् प्रिय वदति, तत् सर्वमनिसन्धातु
मित्यविश्वास । अनिभ्रास्यता हि जन्मभूमिरलङ्घ्या । या
यता च नयन विना न लोकयात्रा स लोकत एव सिद्धा । नात्र
शास्त्रेणार्थ । स्तनन्धयोऽपि हि तैस्तैरुपायै स्तनपान लिप्सते ।
तदपास्यातियत्नेनानुभूयन्ता यथेष्टमिन्द्रियसुखानि । येऽप्यु
पदिशन्ति एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्या-
ज्य सामादिरुपायवर्ग स्वेषु चाजस्र प्रयोज्य, सन्धिविग्र
हचिन्तयैव नेय काल स्वल्पोऽपि सुखस्यावकाशो न
देय' इति तैरप्येभिर्मन्थियत्नैर्युक्तस्तथैवायॉर्जित धन दासो
गृह्येव भुज्यते । के चेते वराका । येऽपि मन्त्रकथाश्रवन्न
फर्तर शुभाङ्गिरसविश्वासात्तयाहुर्दन्तिपुत्रपराशरप्रभृतयस्ते
ऽपिमरिषड्वर्गो जित कृत वा ते शास्त्रानुष्ठानम् । तैरपि हि
प्रारब्धेषु कार्येषु दृष्टे सिद्ध्यसिद्धी । पठन्त्यापठन्ति
सन्दीयमाना बहव ।

नन्विदमुपपन्न देवस्य, यदुत सर्वलोकस्वामी जानि,
अयातयाम वय दर्शनीय वपु, अपरिमाणा विभूति ।
तत्सर्व सर्वविश्वासहेतुना सुखोपभोगप्रतिबन्धिना बहुमार्ग-
विकल्पनात् सर्वकार्येष्वमुकसशयेन नन्वावापेन मा वृथा
वृथा । सन्ति हि ते दन्तिना दश सहस्राणि, हयाना लक्ष त्र
यम् । अनन्त च पादातम् । अपि च पूर्णान्येव हेमरत्नै कोशगृ
हाणि । सर्वश्चैष जीवलोक समग्रमपि युगसहस्र भुञ्जानो न ते
कोष्ठागाराणिरेचयिष्यति । किमिदमपर्याप्त यदन्यार्जितायायास

क्रियते । जीवितं हि नाम जन्मवतां चतुष्पञ्चान्यहानि । तत्रापि भोगयोग्यमल्पाल्प वयःखण्डम् । अपण्डिताः पुनरर्जयन्त एव ध्वंसन्ते । नार्जितस्य वस्तुनो लवमप्यास्वादयितुमीहन्ते । किं बहुना । राज्यभारं भारतमेष्वन्तरङ्गेषु भक्तिमत्सु समर्प्य, अप्सरःप्रतिरूपाभिरन्तःपुरिकाभो रममाणः सङ्गीतपानगोष्ठीश्च यथर्तु यथन् यथार्हं कुरु शरीरलाभम्' इति पञ्चाङ्गीस्पृष्टभूमिरत्नलिचुम्बितचूडश्चिरमशेत । प्राहसीच्च प्रीति फुल्ललोचनोऽन्तःपुरप्रमदाजनः । जननाथश्च सस्मितम् 'उच्चिष्ठ, ननु हितोपदेशाद्गुरवो भवन्तः । किमिति गुरुत्वविपरीतमनुष्ठितम्' इति तमुत्थाप्य क्रीडानिर्भरमतिष्ठत् ।

अथैषु दिनेषु भूयोभूयः प्रस्तुतेऽर्थे प्रयमाणो मन्त्रिवृद्धेन वचसाभ्युपेत्य, मनसा अचिन्तञ्च इत्यवधारितवान् । अथैवं मन्त्रिणा मनस्यभूत्—'अहो मे मोहाद्वालिश्यम् । अचिन्तेऽर्थे नाद्यप्रभृत्यर्थयाच्ञिगतोऽहमस्य हास्यो जातः । स्पष्टमस्य चेष्टानामायथापूर्व्यम् । तथा हि—न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनं वस्तु प्रेषयति, न मत्सुकृतानि प्रगणयति, न मे गृहवार्तां पृच्छति, न मत्पक्षान् प्रत्यवैक्षते, न मामासन्नकार्येष्वन्यत्रीकरोति । न मामन्तःपुरं प्रवेशयति । अपि च, मामनर्हेषु कर्मसु नियुङ्क्ते, मदासनमन्यैरवष्टभ्यमानमनुजानाति, मद्वैरिषु विश्रम्भं दर्शयति, मदुक्तस्यैवचरं न ददाति, मत्समानदोषान् विगर्हति, मर्मणि मामुपहसति, स्वमतमपि मया चर्च्यमानं प्रतिक्षिपति, महार्हाणि वस्तूनि

मत्प्रहितानि नाभिनन्दति, नयज्ञानां म्लेच्छितानि मत्समक्षं मूर्खै-
रुद्घोषयति । सत्यमाह चाणक्यः—'चित्तज्ञानानुवर्तिनोऽनर्था
अपि प्रियाः स्युः । दक्षिणा अपि तद्भावविघ्नकृता द्वेष्या भवेयु'
रिति । तथापि का गतिः । अविनीतोऽपि न परित्याज्यः पितृपै-
तामहैरस्माद्धैरेयमधिपति । अपरित्यजन्तोऽपि कमुपकारमथ-
यमाणवाच' पुमः । सर्वथा नयज्ञस्य वसन्तभानोरश्मकेन्द्रस्य
हस्ते राज्यमिद पतितम् । अपि नामापदो भाविन्यः प्रकृति-
स्थमेनमापादयेयुः । अनर्थेषु सुलभन्यलीकेषु क्वचिदुत्पन्नोऽपि
द्वेषः सद्वृत्तमस्मै न रोचयेत् । भवतु भविता तावदनर्थः ।
स्वभिमतपिशुनजिह्वो यथाकथञ्चिदभ्रष्टपदस्निष्टेयम्' इति ।

एव गते मन्त्रिणि, राजनि च कामवृत्ते, चन्द्रपालितो
नामाश्मकेन्द्रामात्यस्येन्द्रपालितस्य सूनुरसद्वृत्तः पितृनिर्वा-
सितो नाम भूत्वा, बहुभिश्चारणगणैर्वहीभिरनल्पकौशलाभिः
'शिल्पकारिणीभिरनेकच्छद्मविद्भिश्च गूढपुरुषैः परिवृतोऽभ्येत्य
विविधाभिः क्रीडाभिर्विहारभद्रमात्मसादकरोत् । अमुना चैव
संक्रमेण राजन्यास्पदमलभत । लब्धरन्ध्रश्च स यद् यद्
व्यसनमारभते तत् तथेत्यवर्णयत् ।

ते असावपि गुरूपदेशमिवात्यादरेण तस्य मतमन्ववर्तत ।
तच्छीलानुसारिण्यश्च प्रकृतयो विश्रब्धमसेवन्त व्यसनानि ।
सर्वश्च समानदोषतया न कस्यचिच्छिद्रान्वेषणायायतिष्ठ ।
समानभर्तृप्रकृतयस्तन्त्राध्यक्षा. स्वानि कर्मफलान्यभक्षयन् ।
ततः क्रमादायद्वाराणि व्ययशीर्यन्त । व्ययमुखान्यहरहर्व्ययंवर्धन्त ।
सामन्तपौरजानपदमुख्याश्च समानशीलतयोपारूढविश्रम्भेण

राज्ञा सजानयः पानगोष्ठीष्वभ्यन्तरीकृताः स्व स्वमाचारमत्य-
चीपिषुः । तन्मूलाश्च कलहाः सामपाणमुदमथन् । अहन्यन्त
दुर्बला बलिभिः । अपहृतानि धनवतां धनानि तस्करादिभिः ।
अपहृतपरिभूतयः प्रहृताश्च पातकपथाः । हृतगन्धवा हृतविद्या
वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्नश्रुकण्ठ्य प्रजा । दण्डश्रा-
यणग्रहीतो भयक्लोधावजनयत् । कृशकुटुम्बेषु लोभः पदम
धत्त । विमानिताश्च तेजस्विनो मानेनादह्यन्त । तेषु तेषु
चाक्षत्येषु प्रातरन् परोपजापाः ।

अथ वसन्तभानुर्भानुवर्माणं नाम वानवास्य प्रोत्साह्यानन्त-
वर्मणा व्यग्राहयत् । तदानान्तराष्ट्रपर्यन्तश्चानन्तवर्मा तमभियोक्तु
बलसन्नद्धानमकरोत् । सर्वसामन्तेभ्यश्चाग्रमकेन्द्र प्राणेभ्योऽपि
प्रियतरोऽभूत् । अपरेऽपि सामन्ताः समगसत । गत्वा चाभ्यर्ण
कर्मदारोपासि न्यविशन् । तस्मिंश्चावसरे महासामन्तस्य कुन्तल
पतेरवन्तिदेवस्यात्मनाटकीयां दमातलेवीं नाम चन्द्रपालिता
दिभिरतिप्रगल्भनृत्यकौशलामाढ्यानन्तवर्मा नृत्यमद्राक्षीत् ।
अग्रमकेन्द्रस्तु कुन्तलपतिमेकान्ते समभ्यधत्त—'अमत्त एष राज
कलत्राणि नः परामृशति । कियत्यवज्ञा सोढव्या । मम शतमस्ति
हस्तिनाम्, पञ्च शतानि च ते । तदावां सम्भूय मुरलेशं वीर
सेनमूर्ध्वीकृत्यमेकवीरं कोङ्कणपतिं कुमारगुप्तं सासिक्यनाथं
नागपालमुपजपाव । ते चावश्यमस्याविनयमसहमाना अस्म
न्मतेनैवोपायनैरन् । अयं च वानवास्यः प्रियं मे मित्रम्
अमुनैनं दुर्विनीतमभितो व्यतिषक्तं पृष्ठतः प्राहरेम । कोशवाह
च विभज्य गृह्णीमः' इति । हृष्टेन चामुनाभ्युपेते, विश्रुतिं वरांङ्

कानाम्, पञ्चविंशतिं काञ्चनयुक्तुमपलानाम्, ग्राभृतीकृत्यासमुपेत्य तैः सामन्तैः सम्मन्त्र्य तानपि स्वमतावस्थापयत् । उत्तरेद्युश्चेयां सामन्तानां घानवास्यस्य चानन्तवर्मा नयद्वेषादामित्यत्वमगमत् । वसन्तभानुश्च तत्कोशवाहनमयशोर्णमात्माधिष्ठितमेव कृत्वा 'य-थाप्रयास यथायत्न च विभज्य गृह्णीत । युष्मदनुग्रहया येन केनचि-दुपेनाहं तुष्यामि' इति शाट्यात् सर्वानुवर्ती, तेनैवामिषेण निमि-षीकृतेनोत्पादितप्रलोभः सर्वसामन्तानध्वसयत् । 'तदीयं च सर्वस्वं स्वयमेवाग्रसत् । घानवास्य केनचिदुपेनानुगृह्य प्रत्यावृत्य सर्व-मनन्तवर्मणे राज्यमात्मसादकरोत् । अस्मिंश्चान्तरे मन्त्रिवृद्धो वसु-वर्द्धनः कञ्चिन्मौर्तं सम्भूय बालमेव भास्करवर्माणम्, अस्यैव ज्यायसीं भगिनीं त्रयोदशवर्षां मञ्जुवादिनीम्, अनयाश्च मातर महादेवीं वसुन्धरामादायापलपन्नापदोऽस्या भावितया दाक्षिण्य-रोण देहमजहात् । अस्मादृशैर्मित्रैस्तु नीत्वा माहिष्मतीं भर्तृदेवमा-तुलाय भ्रात्रे मित्रवर्मणेऽनपत्याय सापत्या देवी दर्शिताभूत् । ता चार्यामनार्योऽसावन्यथाभ्यमन्यत । निर्भर्त्सितश्च तया 'सुतमियम-खण्डचारित्रा राज्यार्हं चिकीर्षति' इति नैर्गुण्यात्तमेनं बालमजि-घांसीत् । इदं तु ज्ञात्वा देव्याहमादिष्टः—' तात, नालीजङ्घ, जीवतानेनार्भकेण यत्र क्वचिद्वधाय जीव । जीवेय चेदहम-प्येनमनुसारयामि । ज्ञापय मां क्षेमप्रवृत्तः स्वयानम्' इति । अह सद्धले राजकुले कथञ्चिदेन निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पादचारदुःस्थितं चैनमाश्वासयितुं घोषे क्वचिद-हानि कानिचिदु विश्रमय्य, तथापि राजपुरुषसम्पातभीतो दूराध्वमपासरम् । तत्रास्य दारुणपिपासापीडितस्य वारि

दातुकाम कूपेऽस्मिन्नपश्रय पतितस्त्वयैवमनुगृहीतः । त्वमेवा-
स्यातः शरणमेधि विश्रवणस्य राजसूनोः' इत्यञ्जलिमबध्नात् ।
'किमीया जात्यास्य माता' इत्यनुयुक्ते मयामुनोक्तम्—'पाट-
लिपुत्रस्य वणिजो वैश्रवणस्य दुहितरि सागरदत्ताया कोसलेन्द्रात्
कुसुमधन्वनोऽस्य माता जाता' इति । यद्येवम्, एतन्मातुर्म-
त्पितुश्चैका मातामहः' इति सस्नेहं तमह सस्वजे । वृद्धनोक्तम्—
सिन्धुदत्तपुत्राणां कतमस्ते पिता' इति । 'सुश्रुतः' इत्युक्ते
सोऽत्यहृष्यत् ।

अहं तु तं नयावलितमश्मकं नयेनैवोन्मूल्य बालमेनं पित्र्ये
पदे प्रतिष्ठापयेयमिति मतिबाय, कथमस्यैनां क्षुधं क्षपयेयमित्य-
चिन्तयम् । तावदापतितौ च कस्यापि व्याधस्य श्रोनिपूतनीत्य
द्वौ मृगौ स च व्याध. । तस्य हस्तादवशिष्टमिषुद्वयं कोदण्डं
चादित्य तावधिषम् । एकश्च सपत्राकृतोऽन्यश्च निष्पत्रा-
कृतोऽपतत् । तत्रैकं मृगं दत्वा मृगयवे, अन्यस्यापलोमत्वचौ
चिक्कयोर्वसिथ्रीवादीनि शलाकृत्य दावाङ्गारेषु, तप्तेनामिषेण
तयोरात्मनश्च क्षुधमत्यतार्षम् । एतस्मिन् कर्मणि 'मत्सौष्ठवेना-
तिहृष्टं किमतमसि पृष्टवान्—'अपि जानासि माहिष्मतीवृत्ता-
न्तम्' इति । असावाचष्ट—'तव व्याघ्रत्वचो दूतीश्च विक्रीया-
यैवागतः किं न जानामि । प्रचण्डवर्मा नाम चण्डवर्मानुजो
मित्रवर्मदुहितरं मञ्जुवादिनीं विलिप्सुरभ्येतीति तेनोत्सवोत्तरा
पुरी' इति । अथ कर्णे जीर्णमन्त्रयम्—'धूर्तो मित्रवर्मा दुहितरि
सम्यक् प्रतिपत्त्या मातरं विश्वास्य तन्मुखेन प्रत्याकृष्य बालकं
जिघांसति । तत् प्रतिगत्य कुशलमस्य मद्वार्तां च देव्यै रहो

निवेद्य, पुनः कुमारः शार्दूलमत्ति इति प्रकाशमाक्रोशः कार्यः । स दुर्मतिरन्तः प्रीतो यद्दिदं तं दर्शयन् देवीमनुनेष्यति । पुनस्तया त्वत्सुतेन स वाच्य'—'यदपेक्षया त्वन्मतमत्यक्रमिषं सोऽपि बालः पापेन मे परलोकमगात् । 'अद्य तु त्वदादेशकारि-ण्येवाहम्' इति । स तथोक्तः प्रीतिं प्रतिपत्स्यते । पुनरनेन वत्समानयेति महाविषेण संनीय तोयं तत्र मालां मज्जयित्वा तया स वक्षसि मुखे च हन्तव्यः । यत्तव्यश्च स एवायमसि प्रहारः पापीयसस्तव भवतु यद्यस्मि पतिमता' इति । पुनरनेना-गदेन सद्यःमितेऽस्मिन्सि तां मालां मज्जयित्वा स्वदुहित्रे देया । मृते तु तस्मिंस्तस्यां च निर्विकाराया सन्याम्' सतीत्येवैनां प्रकृतयोऽनुवर्तिष्यन्ते । पुनः प्रचण्डधर्मणे सन्देश्यम्—'अना-थमिदं राज्यम् । अनेन सह बालिकेयं स्वीकर्तव्या' इति । तावदाद्यां कापालिकवेषच्छन्नौ देव्यै दीयमानभिक्षौ पुरो यद्दिदमशानं यत्स्याथः । पुनरार्यमायान् पौरवृद्धानामांश्च मन्त्रिवृद्धानेकान्ते ब्रवीतु देवी—'स्वप्नेऽद्य मे देव्या विन्ध्य-वासिन्या कृतः प्रसादः । अद्य चतुर्थेऽहनि प्रचण्डधर्मा मरिष्यति । पञ्चमेऽहनि रेवातटवर्तिनि मन्दवने परीत्य वैजन्य जनेषु निर्गतेषु, कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकु-मारो निर्यास्यति । स राज्यमिदमनुपालय बालं ते प्रतिष्ठा-पयिष्यति । स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य स्थापितः । सा चेयं वत्सा मञ्जुवादिनी तस्य द्विजातिदारकस्य दारत्वेनैव कल्पिता' इति । तदेतदतिरहस्यं युष्मास्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यते' इति ।

स साम्प्रतमनिप्रीतः प्रयातोऽर्थश्चायं यथा चिन्तितमनुष्ठितो-ऽभूत् । प्रतिदिशं च लोकवादः प्रासर्पत्—'अहो माहात्म्यं पतिव्रतानाम् । असिप्रहार एव हि स मालाप्रहारस्तस्मिन् जातः । न शक्यमुपधियुक्तमेतत् कर्मेति वक्तुम् । यतस्तदेव दत्तं दाम दुहित्रे स्तनमण्डनमेव जातं न मृत्युः । योऽस्याः पतिव्रतायाः शासनमतिवर्तते स भस्मैव भवेत्' इति ।

अथ महातिवेपेण मां पुत्रं च मित्रायै प्रविष्टौ दृष्ट्वा प्रस्तुतस्तनी प्रत्युत्थाय हर्षाकुलमब्रवीत्—'भगवन्, अयमञ्जलिः अनाथोऽयं जनोऽनुगृह्यताम् । अस्ति ममैकः स्वप्नः, स किं सत्यो न वा' इति । मयोक्तम्—'फलमस्याद्यैव द्रक्ष्यसि' इति । 'यद्येवं बहु भागधेयमस्या यो दास्याः । स खल्वस्याः सूना-ध्यशंसी स्वप्न' इति मद्दर्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणम्य, भूयोऽपि सा हर्षगर्भमब्रूत—'तच्चेन्मिथ्या सोऽयं युष्मदीयो बालकपाली श्वो मया निरोद्धव्यः' इति । मयापि सस्मितम् 'एवमस्तु' इति लब्धभैक्ष्यो नालीजङ्घमाकार्यं निर्गम्य ततश्च तं चानुयान्तं शनैरपृच्छम्—'कासावलपायुः प्रथिनः प्रचण्डवर्मा' इति । सोऽब्रवीत्—'राज्यमिदं ममेत्यपास्तशङ्को राजास्थानमण्डप एव निष्ट्युपास्यमानः कुशीलवैः ।' इति । 'यद्येवम् , उद्याने तिष्ठ' इति तं जरन्तमादिश्य, तन्नाकारैकपार्श्वं क्वचिच्छून्यमठिकायां मात्राः समर्पयं, तद्गणनियुक्तराजपुत्रः, कृतकुशीलवचेष्टालीलः प्रचण्डवर्माणमेत्यान्वरक्षयम् । अनुर-ञ्जितातपे तु समये, जनसमाजोपयोगीनि संहृत्य नृत्यगीत-नानाविदिवादि-हस्तचङ्क्रमणोर्ध्वपादालातपादापीडवृश्चिकम-

करलङ्घनादीनि मत्स्योद्वर्तनादीनि च करणानि, पुनरादाया-दायासन्नवर्तिनां छुरिकास्ताभिरुपहितवर्म्मां चित्रदुष्कराणि करणानि श्येनपातोत्कोशपातादीनि दर्शयन्, चिरतिचापान्तरालावस्थितस्य प्रचण्डवर्मणश्छुरिकयैकया प्रत्युरस प्रहृत्य, 'जीव्याद्वर्षसहस्रं वसन्तभानुरित्यभिगर्जन्, मद्वाग्भमरूकतुं मुखतासेः कस्यापि चारभटस्य पीवरासवाहुशिखरमाक्रम्य, तावतैव तं विचेतीकुर्वन्, आकुल च लोकमुद्यद्भुकुर्वन्, द्विपुरुषोच्छ्रितं प्राकारमत्यलङ्घयम् । अवप्लुत्य चोपवने 'मदनुपातिनामेष पन्था दृश्यते' इति ब्रुवाण एव नालीजङ्घसमीकृतसेकतास्पृष्टपादन्यासया तमालवीथ्या चानुप्राकारं प्राचा प्रतिप्रधावितः, पुनरयाचोचितेष्टकचितत्वाद्दलदयपातेन प्रहृत्य, लङ्घितप्राकारवप्रातवलयस्तस्यां शून्यमठिकायां तूर्णमेव प्रविश्य, प्रतिमुक्तपूर्वेण सह कुमारेण मत्कर्मतुमुलताजङ्घारुद्धःसलन्धवर्त्मा श्मशानोद्देशमभ्यगाम् । प्रागेव तस्मिन् दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं भग्नपार्श्वस्थैर्यस्थूलप्रस्तरस्थगितद्वाहद्वारं बिलम् ।

अथ गलति मध्यरात्रे घर्घरापनीतमहार्हरत्नभूषणपट्टनिवसनौ तद्बिलमार्गं प्रविश्य तूष्णीमतिष्ठाव । देवी तु पूर्वद्युरेव यथार्हमग्निसत्कार मालयाय दत्त्वा प्रचण्डवर्मणे, चण्डवर्मणे च तामवस्थामश्मकेन्द्रोपधिकृतामेव संदिश्य, उत्तरेद्यु प्रत्युषस्येव पूर्वसंकेतितपौरामात्यसामन्तवृद्धैः सहाभ्येत्य भगवतीमर्चयित्वा, सर्वजनप्रत्यक्षं परीक्षितकुक्षिवैजन्यं तद्भवनं विधाय दत्तदृष्टि सह जनेन स्थित्वा पटीयांसं पटहशब्दमकारयत् ।

अणुतरन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसंज्ञः शिरसैवोत्क्षिप्य सप्रतिमं लोहपादपीठमंसलपुरुषप्रयत्नदुश्चलम् उभयकरविधृतमेकपार्श्वमेकतो निवेश्य निर्गमम् । निर्गमयं च कुमारम् । अथ यथापूर्वमर्चयित्वा, दुर्गमुद्घाटितकपाटः प्रत्यक्षीभूय प्रत्यहदृष्टि स्पष्टरोमाञ्चमुद्धताञ्जलि रूढविस्मयं च प्रणिपतन्ती. प्रकृतीरभ्यधाम्—'इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति—'मया सकृपया शार्दूलरूपेण तिरस्कृत्याय वो दत्तमेनमद्यप्रभृति मत्पुत्रतयाऽमन्दमादृणत इति परिगृह्णन्तु भवन्तः ।' अपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाक्यनिष्ठुराश्मकथट्टघट्टनात्मानं मां मन्यध्वमस्य रक्षितारम् । रक्षानिर्वेशार्थास्य स्वसेयं सुमूरभ्यनुज्ञाता महामायेथा' इति ।

श्रुत्वैतत् 'अहो भाग्यवान् भोजवंशो यस्य त्वमार्यादत्तो नाथः' इत्यभीयन्त प्रकृतयः । सा तु वाचामगोचरं हर्षावस्थामस्पृशन्मे श्वश्रूः । तदहरेव च यथावदग्राह्यन्मञ्जुवादिनीपाणिपल्लवम् । प्रपन्नायां च यामिन्यां सम्यगेव चिलं प्रत्यपूरयम् । अलन्धरन्ध्रश्च लोको नष्टमुष्टिचिन्तादिकथनैरभ्युपायान्तरप्रयुक्तैर्दिव्यांशतामेव मम समर्थयमानो मद्वाचां नात्यवर्तत । राजपुत्र्यार्यादत्त इति प्रभावहेतुः प्रसिद्धिरासीत् । तं च गुणवत्यहनि भद्राकृतमुपनाय्य पुरोहितेन पाठयन्नीति राजकार्याणयन्वतिष्ठम् । अचिन्तयं च—'राज्यं नाम शक्तित्रयायत्तम् । शक्तयश्च मन्त्रप्रभावोत्साहाः परस्परानुगृहीताः कृत्येषु क्रमन्ते । मन्त्रेण हि विनिश्चयोऽर्थानाम्, प्रभावेण प्रारम्भः, उत्साहेन निर्वहणम् । अतः पञ्चाङ्गमन्त्रमूलो द्विरूपप्रभावस्कन्धश्चतुर्गुणोत्साहविटपो

द्विरसतिम्रकृतिपत्रः षड्गुणदिसलयः शक्तिसिद्धिपुष्पफलश्च नयवनस्पतिर्नेतुरुपकरोति । स चायमनेकाधिकरणत्वादसहायेन दुरुपजीवः । यस्त्वयमार्यकेतुनाम मित्रवर्ममन्त्री स कोसलाभिजनत्वात् कुमारमात्रपक्षो मन्त्रिगुणैश्च युक्तः, तन्मतिभवमदयैव ध्वस्तो मित्रवर्मा । स चेद्वक्तव्यः पेशलम्' इति । अथ नालीजङ्घं रहस्यधिक्षेपम्—'तात, आर्यमार्यकेतुमेकान्ते ब्रूहि—'को न्वेष मायापुरुषो य इमां राज्यलक्ष्मीमनुभवति । स चायमसद्धानो भुजङ्गेनामुना परिगृहीत., किमुद्वीयेत अस्येत वा' इति । स यद् यदिष्यति तदस्मि योध्य.' इति ।

सोऽन्यदय मामावेदयत्—'मुहुरुपास्य प्राभृतं., प्रवर्त्य चित्राः कथा', संवाह्य पाणिपादम्, अतिविस्रम्भदत्तक्षणं तमभ्यर्णं त्वदुपदिष्टेन नयेन । सोऽप्येवमकथयत्—'भद्र, मैवं वादीः । अभिजनस्य शुद्धिः, असाधारणं बुद्धिनैपुणम्, अतिमानुषं प्राणबलम्, अपरिमाणमौदार्यम्, अत्याश्चर्यमस्त्रकौशलम्, अनल्पं शिल्पज्ञानम्, अनुग्रहार्द्रं चेतः, तेजश्चाप्यविषह्यमध्यमिश्रीणम्, इत्यस्मिन्नेव सन्निपातिनो गुणा येऽन्यत्रैकैकशोऽपि दुर्लभाः । द्विपलामेष चिरविल्वद्रुमः, ग्रहणान्तु चन्दनतरुः । तमुद्धृत्य नीतिशास्त्रमन्थमश्मपृष्ठमिमं च राजपुत्रं पित्र्ये पदे प्रतिष्ठितमेव विद्धि । नात्र संशयः कार्यः' इति । तथापि श्रुत्वा भूयोभूयश्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम् । तस्मैश्च सत्यशौचयुक्तानमात्यान् विविधव्यञ्जनांश्च गूढपुरुषानुदपादयम् । तेभ्यश्चोपलभ्य लुब्धसमृद्धमत्युत्सिक्तमविधेयप्रायं च प्रकृतिमण्डलम्, अलुब्धतामभिख्यापयन्,

धार्मिकत्वमुद्भावयन्, नास्तिकान् कदर्थयन्, फण्टकान् विशोधयन्, अमित्रोपधीनुपघ्नन्, चातुर्वर्ण्यं च स्वधर्मकर्मसु स्थापयन्, अभिसमाहरेयमर्थान्। अर्थमूला हि सर्वकर्मारम्भा.। न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यात्' इत्याकलय्य योगान्न्यतिष्ठम्। अथाश्मकेन्द्रं समरे निहत्य तद्राज्यं राजसूनुसाद्भिधाय तद्रक्षणार्थं मौलान् स्वानधिकारिणो नियुज्यात्मीभूतेनाश्मकेन्द्रसैन्येन च साकं विदर्भानभ्येत्य राजधान्यां तं राजतनयं भास्करवर्माणमभिषिच्य पित्र्ये पदे न्यवेशयम्। सोऽप्युत्कलाधिपतेः प्रचण्डवर्मणो राज्य मह्यं प्रादात्। अहं च तद्राज्यमात्मसात् कृत्वा राजानमामन्त्र्य यावत्स्वदेशैषणाय प्रयाणोपक्रमं करोमि तावदेवाङ्गनाथेन सिंहवर्मणा स्वसाहाय्याकारितोऽत्र समागतः पूर्वपुण्यपरिपाकात् स्वामिना समगंसि।'

शुकनासोपदेशः ।

तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं निसर्गेत एवाभानुभेद्यमरत्ना-लोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो मदः । पुंसामनल्पनर्तितसाध्य-मपरमैश्वर्यतिमिरान्धत्वम् । अशिशिरोपचारहार्योऽत्यन्ततीव्रो दर्पदाहज्वरोष्मा । सततममृतमन्त्रगम्यो विषमो विषयविषा-स्वादमोहः । नित्यमस्नानशौचवध्यो बलवान्रागमलावलेपः । अजस्रमत्तपावस्थानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति । इत्येतो विस्तरेणाभिधीयसे । गर्भेश्वरत्वमभिनवयौवन-त्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्प-रा । सर्वविनयानामेकैकमत्रैषामायतनम् । किमुत समवायः । यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुप याति बुद्धिः । अनुन्मिलनधवलापि सरागैव भवति दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्धूतरजोभ्रान्तिरति-दूरमात्मेच्छया यौवनसमये पुरुष प्रकृतिः । इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका । नवयौवनकषायि-तात्मनश्च सलिलमिव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः । नाशयति च दिङ्मोह इवोन्मार्ग-प्रवर्तकः पुरुषमत्यासङ्गो विषयेषु । भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव

रजनिकरगमस्तयो विशन्ति मुखमुपदेशगुणाः । गुरुवचनममल-
मपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य ।
घृतस्य तु करिण इव शङ्खाभरणमाननयोमासमुदयमधिक-
तरमुपजनयति । हरति च सकलमतिमलिनमप्यन्धकारमिव
दोषजातं प्रदोषसमयनिशाकर इव गुरूपदेशः । प्रशमहेतुर्वयःप-
रिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन्गुणरूपेण
नदेव परिणामयति । अयमेव चानास्वादितविषयरसस्य ते
काल उपदेशस्य । कुसुमशरशरप्रहाराज्जर्जरितं हि हृदये जल-
मिव गलन्युपदिश्यम् । अकारणं च भवति दुष्प्रकृतेरन्वय-
श्रुतं वा विनयस्य । चन्दनप्रभवो न दहति किमनलः । किं वा
प्रशमहेतुनापि न प्रत्यूहतरीभवति वडवानलो वारिणा ।
गुरूपदेशश्च नाम पुरुषाणामखिलमतप्रक्षालनक्षममजलं स्ना-
नमनुपशान्तपलितादिवैरूप्यमजरं वृद्धत्वमनारोपितमेदोदोषं
गुरुकरणमनुद्वर्णविरचनमप्राप्यं व्रणानिरणमतीतज्योतिरा-
लेकं नोद्वेगकरः प्रजागरः । विशेषेण तु राज्ञाम् । विरला हि
तेषामुपदेष्टारः । प्रतिशब्दक इव राजवचनमनुगच्छति जनो
भयात् । उद्दामदर्पैश्वर्यगुरुत्यगितश्रवणविवराश्चोपदिश्यमान-
मपि ते न शृण्वन्ति । शृण्वन्तोऽपि च गजनिमीलितेनावधी-
रयन्तः खेदयन्ति हितोपदेशदायिनो गुरून् । अहङ्कारदाहज्वर-
मूर्छान्धकारिता विह्वला हि राजप्रकृतिः । अलीकाभिमानो-
न्मादकारीणि धनानि । राज्यश्रियविकारतन्द्राप्रदा राजलक्ष्मीः ।

आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् ।
इयं हि सुमङ्गलमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीर-

सागरात्पारिजातपल्लवेभ्यो रागमिन्दुशकलादेकान्तवक्रतासु-
च्चैःश्रवसश्चञ्चलतां कालकूटान्मोहनशक्तिं मदिरायाः मदं
कौस्तुभमणेरतिनैष्ठुर्यमित्येतानि सहवासपरिचयवशाद्विरह-
विनोदचिन्हानि गृहीत्वेवोद्गता । न ह्येवंविधमपरमप-
रिचितमिह जगति किञ्चिदस्ति यथेयमनार्या । लग्धापि
खलु दुःखेन परिपाल्यते । दृढगुणपाशसन्दाननिष्पन्दीकृतापि
नश्यति । उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृता-
प्यपक्रामति । मद्जलदुर्दिनान्धकारगजघटितवनघटापरिपा-
लितापि प्रपलायते । न परिचयं यति । नाभिजनमीक्षते ।
न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति ।
न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते ।
न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पाल-
यति । न सत्यमनुरुध्यते । न लक्षणं प्रमाणीकरोति । गन्धर्व-
गरलेनेव पश्यत एव नश्यति । अध्यारूढमन्दरपरिवर्तवि-
र्तभ्रान्तिजनितसंस्कारेव परिभ्रमति । कमलिनीसञ्चरणव्य-
तिकरसञ्जनलिननालकण्टकेव न क्वचिन्निर्भरमाघ्नाति पदम् ।
अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्ड-
मधुपानमत्तेव परिस्खलति । पाद्मप्यमिवोपश्लिष्टितुमसिधारासु
निवसति । विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम् ।
अप्रत्ययबहुला च दिवसान्धकमलमिव समुपचितमूलदण्ड-
कोषमण्डलमपि मुञ्चति भूभुजम् । दुष्टपिशाचीव दर्शितानेक-
पुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति । सरस्वतीपरि-
गृहीतमीर्ष्ययेव नालिङ्गति जनम् । गुणवन्तमपवित्र-

मिव न स्पृशति । उदारसत्त्वममङ्गलमिव न बहु मन्यते । सुजनमनिमित्तमिव न पश्यति । अभिजातमहिमिव लङ्घयति । शूरं कण्टकमिव परिहरति । दातारं दुःस्वमिव न स्मरति । विनीत पातक्रिनमिव नोपसर्पति । मनस्विनमुन्मत्तमिवोपहसति । परस्परविरुद्ध चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम् । तथा हि । सततमुष्णमारोपयन्त्यपि जाड्यमुपजनयति । उन्नतिमादधानापि नीचस्वभावतामाविष्करोति । तोयराशिसम्भवापि तृष्णां सवर्धयति । ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति । बलोपचयमाहरन्त्यपि लघिमानमापादयति । अमृतसहोदरापि कटुकविपाका । विग्रहवत्यप्यप्रत्यक्षदर्शना । पुरुषोत्तमरतापि खलजनप्रिया । रेणुमयीव स्वच्छमपि कलुषीकरोति । यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्गमति । तथा हीयं संवर्धनवारिधारा तृष्णाविषवल्लीनां व्याधगीतिरिन्द्रियमृगाणां परामर्शधूमलेखा सञ्चरितचित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णचत्वरं धनमदपिशाचिकानां तिमिरोद्भतिः शास्त्रदृष्टीनां पुरःपताका सर्वविनयानामुत्पत्तिनिम्नगा क्रोधावेगग्राहाणामापानभूमिर्विषयमधूनां सङ्गीतशाला भ्रूविकारनाट्यानामावासदरी दोषाशीविषाणामुत्सारणवेत्रलता सत्पुरुषव्याहाराणामकालप्रावृड् गुणकलहंसकानां विसर्पणभूमिर्लोकापवादविस्फोटकानां प्रस्तावना कपटनाटकस्य वध्यशाला साधुभावस्य राहुजिह्वा धर्मेन्दुमण्डलस्य । न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्र-

लब्ध । नियतमियमालेख्यगतापि चलति पुस्तकमध्यपीन्द्र जालमाचरत्युत्कीर्णापि विप्रलभते श्रुताप्यभिसन्धत्ते चिन्तितापि वञ्चयति ।

पथयिधयापि चानया दुराचारया पथमपि दैववशेन परि गृहीता विक्लवीभवन्ति राजान । सर्वाविनयाधिष्ठानता च गच्छन्ति । तथा हि । अभिषेकसमय एवैषां मङ्गलकलशजलै रिव प्रक्षाल्यते दाक्षिण्यम् । अग्निकार्यधूमेनेव मलिनीभवति हृदयम् । पुरोहितशुभाम्रसमार्जनीभिरिवापनीयते क्षान्ति । उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम् । आतपत्रमण्ड लेनेवापवार्यते परलोकदर्शनम् । चामरपवनैरिवापह्रियते स्व यादिता । वेत्रदण्डैरिवोत्सार्यन्ते गुणा । जयशब्दकलकलै रिव तिरस्क्रियन्ते साधुवादा । ध्वजपटपल्लवैरिव परामृश्यते यश । तथाहि । केचिच्छुभवशशिथिलशकुनिगलपुटचपलाभि स्वयो तोन्मेषमुहूर्तमनोहराभिर्मनस्विजनगर्हिताभि सम्पद्भि प्रलो भ्यमाना धनलवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन दुष्टाश्वेनेव रागावेशेन वाह्यमाना विविधविषयग्रासलालसै पञ्चभिरप्यनेकसहस्रसङ्ख्यैरिवेन्द्रियैरायास्यमाना प्रकृतिचञ्च लतया लब्धप्रसरैरेकैकेनापि शतसहस्रतामिवोपगतेन मनसाकु लीक्रियमाणा विह्वलतामुपयान्ति । ग्रहैरिव गृह्यन्ते । भूतैरि वाभिभूयन्ते । मन्त्रैरिवावेश्यन्ते । सत्त्वैरिवावष्टभ्यन्ते । वायु नेव विडम्ब्यन्ते । पिशाचैरिव गस्यन्ते । धनोष्मणा पच्यमाना इव तिर्यक्परिभ्रमन्ति । अधर्ममग्नगतय पङ्क इव परेण सञ्चा र्यन्ते । मृषावादविपाकसञ्जातमुखरोगा इवातिकृच्छ्रेण जल्प

लि । सलच्छन्दतय इव कुलुलगलोविकारैरासक्षयन्तिनां शिरः-शूलमुत्पादयन्ति । आलस्यतन्त्रय इव बन्धुजनमपि नाभिजानन्ति । उत्कुटिलोचना इव तेजस्विनो नेक्षन्ते । कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते । जातुषा नरणालीव सोष्माणं न सहन्ते । दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गुरून्युदेशम् । तृष्णाविमूर्च्छिता कनकमयमिव सर्वं पश्यन्ति । इव इव पानविह्वलतैश्वर्यैः परप्रेरिता विनाश-यन्ति । दुश्चिकित्स्यान्यपि फलानीव दण्डविद्वेषैर्महाकुलानि शातयन्ति । अकालकुसुमप्रसवा इव मनोहरानृतयोऽपि लोकविनाशहेतवः । श्मशानाग्नय इवातिरौद्रभूतयः । तैमिरिका इवादृष्टगुणः । अपस्मारा अपि प्रेतग्रहा इवोद्वेजयन्ति । चिन्यमाना अपि महापातकाग्निज्वाला इवापद्वनुपजनयन्ति । अनुदिवसमापूर्यमाणाः पापैरेवाप्यायितभूतयो भवन्ति । तद्व-स्याश्च व्यसनगुरुस्खलनानुपनता वल्मीकतृणाग्रावस्थिता जलबिन्दव इव पतितव्यान्नार्तं नावगच्छन्ति ।

अपरे तु न्यायलिखादनपरैर्मनस्विभिरासन्नगृध्रैर्गल्यानन-लिलविक्षेपैर्नं विनोद इति मृगया अस्त इति पानं विलास इति प्रकृतया शौर्यमिति गुरुवचनावधीरणपरलोकपराङ्मुख्यमित्यजित-भृत्यता सुखोपभोग्यत्वमिति परिभवसहत्वं क्षमेति स्वच्छन्दता प्रभुत्वमिति देवायत्तानं महात्मतेति वन्दिजनव्याहारैर्यश इति तरलतोत्साह इत्यविनयमनाऽपहायातित्वमिति दोषानपि गुणपक्षव्यायोपयद्भिरन्धैः स्वयमपि विद्वद्भिः प्रतारणा-कुशलैर्धूर्तैरनुपाचिताभिः स्तुतिभिः प्रतार्यमाणा चित्तमदम-

चचित्ता निश्चेतनतया नर्थेत्यात्मन्यारोपितालीकाभिमाना मर्त्यधर्माणोऽपि दिव्यांशायतीर्णमिव मदंघनमिवातिमानुषमात्मानमुत्प्रेक्षमाणा प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यतामुपयान्ति । आत्मविद्भ्यानां चानुजीविना जनेन क्रियमाणामभिनन्दन्ति ।* मनसा देवताध्यारोपणप्रतारणादसद्भूतसम्भावनोपहृताश्चान्तःप्रविष्टापरभुजङ्गयमिवात्मबाहुयुगलं सम्भावयन्ति । त्वगन्तरिततृतीयलोचन इवललाटमाशङ्कन्ते । दर्शनप्रदानमप्यनुग्रहं गणयन्ति । दृष्टिपातमप्युपचारपदे स्थापयन्ति । सम्भाषणमपि मंत्रिभागमध्ये कुर्वन्ति । आज्ञामपि वरप्रदानं मन्यन्ते । स्पर्शमपि पावनमाकलयन्ति । मिथ्याऽऽभ्यात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । न पूजयन्ति द्विजातीन् । न मानयन्ति मान्यान् । नार्चयन्त्यर्चनीयान् । नाभिवादयन्त्यभिवादनार्हान् । नाभ्युत्तिष्ठन्ति गुरून् । अनर्थकाया सान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम् । जपार्थं क्लान्यमलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रशापरिमर्श इत्यसूयन्ति सचिवोपदेशाय ।* कुप्यन्ति हितवादिने । सर्वथा नमभिनन्दन्ति तमालपन्ति तं पार्श्वे कुर्वन्ति तं संवर्धयन्ति तेन सह सुखमवतिष्ठन्ते तस्मै ददति तं मित्रतामुपयन्ति तस्य वचनं शृण्वन्ति तत्र वर्तन्ति तं बहु मन्यन्ते तमात्मतामापादयन्ति योऽहर्निशमनवरतमुपचितानञ्जलिरधिदैवमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति ।* किं वा तेषां साम्प्रतं येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणमभिचारक्रियाकल्पैकल्पकृतय पुरोधसो गुरवः पराभिसन्धानपरा

मन्त्रिण उपदेष्टारो मारणात्मकेषु शास्त्रेष्वभियोगः सहजप्रेमा-
द्रहृदयानुरक्ता भ्रातर उच्छेद्याः ।

तदेवंभायेऽतिकुटिलकष्टचेष्टासहस्रवाहणे राज्यतन्त्रेऽस्मि-
न्महामोहकारिणि च यौवने, कुमार, तथा प्रयतेथा यथा
नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपा-
लभ्यसे सुहृद्भिर्न शोच्यसे विद्विद्भि, यथा च न प्रनार्यसे
कुशलैर्नाविलुप्यसे सेवकवृकैर्न वञ्च्यसे धूर्तैर्न विडम्ब्यसे
लक्ष्म्या न नर्त्यसे मदेन नाक्षिप्यसे विषयैर्न विकृष्यसे
रागेण नापह्रियसे सुखेन । कामं भवान्प्रकृत्यैव धीरः । पित्रा
च महता प्रयत्नेन समारोपितसंस्कारः । तरलहृदयमप्रतिबुद्धं
च मदयन्ति धनानि । तथापि भवद्गुरुसन्तोषो मामेवं मुख-
रीकृतवान् । इदमेव च पुनः पुनरभिधीयसे । विद्वांसमपि
सचेतनमपि महासत्त्वमप्यभिजानमपि धीरमपि प्रयत्नवन्त-
मपि पुरुषमियं दुर्विनीता वशीकरोति लक्ष्मीरिति । सर्वथा
कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषे-
कमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम् ।
श्रवणमय द्विषतां शिरांसि । उन्नमय बन्धुवर्गम् । अभिषेका-
नन्तरं च प्रारब्धदिग्विजयः परिम्लानोज्जीवितामपि तव पित्रा
सप्तद्वीपभुक्तां पुनर्विजयस्व वसुन्धराम् । अयं च ते कालः
प्रतापमारोपयितुम् । आरूढप्रतापो हि राजा शैलोन्नतदर्शनेव
सिद्धादेशो भवति ।

महाश्वेता-वृत्तान्तः ।

राजपुत्र, किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन । तथापि यदि महत्कुतूहलं तत्कथयामि । श्रूयताम् ।

एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव यथा विबुधसन्नन्यप्सरसो नाम कन्यकाः सन्ति । तासां चतुर्दश कुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् । अन्यद्वेदेभ्यः सम्भूतम् । अन्यदग्नेरुद्भूतम् । अन्यत्पवनात्प्रसूतम् । अन्यदमृतान्मथ्यमानादुत्थितम् । अन्यज्जलाज्जातम् । अन्यदर्ककिरणेभ्यो निर्गतम् । अन्यत्सोमरश्मिभ्यो निष्पतितम् । अन्यद्भूमेरुद्भूतम् । अन्यत्सौदामिनीभ्यः प्रवृत्तम् । अन्यन्मृत्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत् तु दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनिरिष्टा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् । एवमेतान्येकत्र चतुर्दश कुलानि । गन्धर्वाणां तु दक्षात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम् । अत्र मुनेस्तनयश्चित्ररथादीनां पञ्चदशानां भ्रातृणामधिको गुणैः पीडशश्चित्ररथो नाम समुत्पन्नः । स किल सकलत्रिभुवनप्रख्यातपराक्रमो भगवता समस्तसुरमौलिमालालालितचरणनलिनेनाखण्डलेन सुहृच्छ्रद्धेनोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमखिलतामरीचिनिचयमे-

चरितेन धातुना समुपार्जितं शैशव पचासवान्। इतश्च नाति-
दूरे तस्यासाद्भारतवर्षादुत्तरेणानन्तरे किम्पुरुषनाम्नि वर्षे
वर्षपर्वतो हेमकूटो नाम निवासः। तत्र च तद्भुजयुगपरिपा-
लितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति। तेनैव चेद्
चैत्ररथं नामातिमनोहरं काननं निर्मितम्। इदं चाच्छोदामि-
धानमतिमहत्सरः खानितम्। अयं च भवानीपतिरुपरचितो
भगवान्। अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्याणां पञ्चानां
ज्येष्ठो हंसो नाम जगद्विदितो गन्धर्वस्तस्मिन्द्वितीये गन्धर्वकुले
गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपद्मासा-
दितवान्। अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव
गिरिरधिशास्तेः। यतु तत्सोममयूखसम्भवमप्सरसां कुलं
तस्मात्किरणजालानुसारगलितेन सकलेनेव रजनिकरकला-
कलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती
द्विजेयेव गौरं गोपतिं नाम्ना हिमकरकिरणावदातवर्णा
कन्यका प्रसूता। तां च द्वितीयगन्धर्वकुलाधिपतिं हंसो
मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत्। सा तु भगवता
मकरकेतुनेव रतिः शरत्समयेनेव कमलिनी हंसेन संयोजिता
सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती। निखिलान्तः-
पुरस्वामिनी च तस्यामवत्। तयोश्च तादृशयोर्महात्मनोरह-
मीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेक-
धातुजा समुत्पन्ना। तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन
महोत्सवेन मज्जन्माभिनन्दितवान्। अवाप्ते च दशमेऽहनि
कृतयोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्।

साह पितृभवने बालतया कलमधुरभ्रलापिनी योषेव गन्धर्वाणा मद्भादङ्क सञ्चरन्त्यनिदितस्नेहणाकाथासमनोहर शैशवमतिनी तयती । भ्रमेण च कृत मे वपुषि वसन्त इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधुकरेण मधुकर इव मदेन नवयौवनन पदम् ।

अथ सकलजीवलोकहृदयानन्ददायकयु मधुमासदिवसेषु कदाहमम्बया सह मधुमासविस्तारिनर्णाम प्रोत्फुल्लनवनलिन कुमुदकुवलयकह्लारमिदमच्छोद सर स्नातुमभ्यागमम् । अत्र च स्नानार्थमागतया मागत्या पार्वत्या तटशिलातलेषु विलि- खितानि चम्बकप्रतिचित्रकानि चन्द्रमाना भ्रमरभरभुग्नगर्भ केसरजर्जरेषु सुमोपहारस्याऽय लतामण्डप, परभृतनयको टिपादितकुड्मलनालविगलितमधुधार सुपुप्पितोऽय सहकारतरु उन्मदमयूरकुलकलकलभीतभुजङ्गमुक्ततला शिशि रय चन्दनयोषिता विकचकुसुमपुञ्जपातसूचितवनदेवताप्रेमो लनशोभनेय लतादोला, यहलेकुसुमरज पटलेभ्रक लहसद् ललमतिरमणीयमिद तीरतरुतलम् इति स्निग्धमनोहरतरोद्देश दर्शनलाभादितहृदया सह सर्वजनेन व्यचरम् ।

एकस्मिञ्च प्रदेशे झटिति वनानिलेनोपनीतनिर्भरविकसि तेऽपि काननेऽभिभूतान्यपुसुमपरिमल ' विसर्पन्तमतिसुरभित यानुलिम्पन्तमिव तर्पयन्तमिव पूरयन्तमिव घ्राणेन्द्रियमहमह मिकया मधुकरकुलैरनुध्यमानमनाघ्रातपूर्वममानुषलोकोचित कुसुमगन्धमभ्यजिघ्रम् । कुतोऽयमित्युपारूढकुतूहला चाह मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कौतुक

नूरलाभ्यधिकतरोपजातमणिनूपुरझङ्काराकृष्टसरःकलहंसानि कतिचित्पदानि गत्वा हुतहुताशनेन्धनीकृतमदनशोकविधुरं वसन्तमिव तपस्यन्तम्, आत्मानुरूपेण सत्वयसापरेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतम्, अतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः, मलयमारुतागमनार्थलाजाञ्जलिमिव मधुमासस्य, यौवनलीलामिव कुसुमलक्ष्म्याः, कृत्तिकातारास्तवकानुकारिणीम्, अमृतबिन्दुनिस्यन्दिनीम्, अदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्। अस्या परिभूतान्यकुसुमामोदा नन्वयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणोऽहमचिन्तयम्—'अहो रूपातिशयनिष्पादनोपकरणकोपस्याक्षीणता विधातुः। यद् त्रिभुवनाद्भुतरूपसम्भारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरुत्पादितः। मन्ये च सकलजगन्नयनानन्दकरं शशिचिह्नं विरच्यता लक्ष्मीलीलावासभवनानि कमलानि सृजता प्रजापतिना प्रथममेतदाननाकारकरणकौशलाभ्यास एव कृतः। अन्यथा किमिदं हि सदृशवस्तुविरचनायां कारणम्। अलीकं चेदं यथा किल सकला कलाः कलावतो बहुलपक्षे क्षीयमाणस्य सुपुण्यनाम्ना रश्मिना रविरापिबतीति। ताः खल्वस्य गर्भस्तयः समस्ता वपुरिदमाविशन्तीति। कुतोऽन्यथा रूपापहारिणि क्लेशबहुले तपसि वर्तमानस्येदं लावण्यम्। इति चिन्तयन्ती-

मेघ मामचिचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधुकरीं परवशामकरोत् ।

उच्छ्वसितैः सह विस्मृतनिमेषेण चक्षुषा सस्पृहमापिबन्तीव किमपि याचमानेव त्वदायत्तास्मीति वदन्तीवाभिमुखं हृदयमर्पयन्तीव सर्वात्मनानुप्रविशन्तीव तन्मयतामिव गंतुमीहमाना मनोभवाभिभूता मामस्त्वेति शरणमिवोपयान्ती, देहि हृदयेऽवकाशमित्यर्थितामिव दर्शयन्ती, हा हा किमिदमसाम्प्रतमनिहेपणमकुलकुमारीजनोचितमिदं मया प्रस्तुतमिति जानानाप्यप्रभवन्ती करणानां, स्तम्भितेव लिखितेवोत्कीर्णेव संयतेव मूर्च्छितेव केनापि विधूतेव निष्पन्दसकलावयवया तत्कालाविर्भूतेनावष्टम्भेनाकस्मिकशिथिलितेनानाख्येयेन स्वसंवेद्येन केवल न विभाव्यते किं तद्रूपसम्पदा किं मनसा किं मनसिजेन किमभिनयेनैव किमनुरागेणैवोपदिश्यमाना किमन्येनैव केनापि प्रकारेणाहमपि न जानामि कथ कथमिति तमतिचिरं व्यलोकयम् । उत्क्षिप्यं नीयमानेव तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन पृष्ठतः प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नमात्मानमधारयम् । अनन्तरं च मेऽन्तर्दैनायकायमिव दातुमाहितसन्ताना निरीयुः श्वासमरुत. । स्वेदसालिलवले खाच्चालतेवागलल्लज्जा । मकरध्वजनिशितशरनिकरनिपातत्रस्तेवाकम्पत गात्रयष्टिः । तद्पातभयं द्रष्टुमिव कुतूहलाद्भ्रेष्यो निरगाद्रोमाञ्चजालकम् । अशेषतः स्वेदाम्भसा धौतश्रवणयुगलादिव हृदयमविशद्रागः ।

आसीच्च मम मनसि—'शान्तात्मनि दूरीकृतमदनविकारे तपोधने किमनेन प्रस्तुतेन । तदलमनेन मुग्धजनोचितेन । उत्तिष्ठ गच्छ स्वाश्रमपदम् । अथवा क्व गच्छामि । कथं वा गच्छामि । कथं वा तपोधनसमीपे तिष्ठामि । कथं वा तिष्ठ

व्यतिकरेऽस्मिन्ने मां निक्षिपता किमिदमनार्येणासदृशमाचरितं मनसिजेन । एवं च नामातिमूढं हृदयमङ्गलाजनस्य यदनुरागविषययोग्यतामपि विचारयितुं नालम् । क्वेदमतिभास्वरं धाम तेजसां तपसां च । क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिकल्पितानि । नियतमयं मामेव मकरलाञ्छनेन विडम्ब्यमानामुपहसति मनसा । चित्रं चेदं यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसहर्तुम् । अन्या अपि कन्यकाजनपामपहाय स्वयमुपयाताः पतीन् । अन्या अप्यनेन दुर्विनीतेन मन्मथेनोन्मत्तता नीता नार्यः । न पुनरहमेका यथा । कथमनेन क्षणेनाकारमात्रालोकनाकुलीभूतमेवमस्वतन्त्रतामुपैत्यन्तःकरणम् । कालो हि गुरुश्च दुर्निवारतामारोपयति मद्विधस्य सर्वथा । यावदेव सचेतनास्मि यावदेव च न परिस्फुटमनेन विभाव्यते मे मदनदुश्चेष्टितलाघवमेतत्तावदेवास्मात्प्रदेशादपसर्पणं श्रेयः । कदाचिदनभिमतस्मरविकारदर्शनकुपितोऽयं शापाभिज्ञां करोति माम् । अदूरकोपा हि मुनिजनप्रकृतिः ।' इत्यवधार्यापसर्पणाभिलाषिण्यहममवम् । अशेषजनपूजनीया चेयं जातिरिति कृत्वा तद्दर्शनाकृष्टदृष्टिप्रसरमस्मै प्रणाममकरवम् ।

अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो मनोभुव , मद्जाननतया च मधुमासस्य, अतिरमणीयतया च तस्य प्रदेशस्य, अविनयबहुलतया चाभिनवयौवनस्य, चञ्चलप्रकृतितया चेन्द्रियाणाम्, दुर्निवारतया च विषयाभिलाषाणाम्, चपलतया च मनोवृत्तेः, तथा भवितव्यतया च तस्य

तस्य वस्तुनः, किं पशुना मम मन्दभाग्यदौरात्म्यादस्य चेद्दृशस्य क्लेशस्य विहिनत्वात्, तमपि मल्लिकादर्शनापहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः । तदा तस्याप्यभिनवागतं मदन प्रत्युद्गच्छन्निव रोमोद्गमः प्रादुरभवत् । मत्सकाशमभिप्रस्थितस्य मनसो मार्गमिवोपदिशद्भिः पुरः प्रवृत्तं श्वासैः । वेपथुगृहीता यतमङ्गभोगेवाकम्पत करतलगताऽक्षमाला । द्वितीयेव कर्णावसक्तकुसुममञ्जरी कपोलतलासङ्गिनी समदृश्यत स्वेदसलिलसीकरजालिका । मद्दर्शनप्रीतिविस्तारितस्य चोत्तानतारकस्य पुण्डरीकमयमिव तमुद्देशमुपदर्शयतो लोचनयुगलस्य विसर्पिभिरंशुसन्तानैर्यं दृच्छयाच्छोदसलिलमपहाय विकचपुटलयवलैरिव गगनतलसमुत्पतितैरदृश्यन्त दश दिशः । मया तु तस्यानिप्रकटया विकृत्या द्विगुणीकृतमदनाग्नेशा तत्क्षणमदृश्यवर्णनयोग्यां कामप्यवस्थामन्वभवम् । प्राप्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्—'भगवन्, किमभिधानः कस्य चायं तपोधनसुता । जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोऽयमनाघ्रातपूर्वो गन्ध' इति । स तु मामीषद्विहस्यावदत्—'बाले, किमनेन पृष्टेन प्रयोजनम् । अथ कौतुकमावेदयामि । श्रूयताम् ।

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्तिरत्युदारतया सुरासुरसिद्धवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुनाम । तस्यायमात्मज । पुण्डरीक इति नाम । इयं च सुरासुरैर्मथ्यमानात् क्षीरसागरादुद्गतः

पारिजातनामा पादपस्तस्य मञ्जरी । यथा चैषा अतविष-
द्रुमस्य श्रवणसंसर्गमासादितवती तदपि कथयामि ।
अद्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितु-
ममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्निर्गत्य सा-
क्षान्मधुमासलक्ष्मीरिव ललितहस्तावलम्बया नन्दनवनदेवतया पा-
रिजातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितः-'भगवन्, सक-
लत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सदृशोऽयमलङ्कार-
प्रसीद क्रियताम् । इयमवतंसविलासदुर्ललिता समारोप्यतां
श्रवणशिखरम् । अजतु सफलतां जन्म पारिजातस्य ।' इत्येव-
मभिदधानां चायमात्मरूपस्तुतिवादन्नपावनमितविलोचनस्ता-
मनाद्दृत्यैव गन्तुं प्रवृत्तः । मया तु तामनुयान्तीमालोच्य
'को दोषः सखे, क्रियतामस्याः प्रणयपरिग्रहः' इत्यभिधाय बला-
दियमनिच्छतोऽप्यस्य कर्णपूरीकृता । तदेतत्कात्स्न्र्येन योऽयं
या चेयं यथा चास्य श्रवणशिखरं समारूढा तत्सर्वमावेदितम् ।

इत्युक्तवति तस्मिन्स तपोधनयुवा किञ्चिदुपदर्शितस्मि-
तो मामवादीत्-'अयि कुतूहलिनि, किमनेन प्रश्नायासेन ।
यदि रुचितसुरभिपरिमला गृह्यतामियम् ।' इत्युक्त्वा समु-
पसृत्यात्मीयाच्छ्रवणादपनीय मदीये श्रवणपुटे तामकरोत् । मम
तु तत्करतलस्पर्शलाभेन तत्क्षणमपरमिव पारिजातकुसुममव-
तंसस्थाने पुलकमासीत् । स च मत्कपोलस्पर्शेन तरलीकृताङ्गु-
लिजालकात्करतलादद्धमालां गलितामपि नाज्ञासीत् । अथाहं
तामसक्प्रातामेव भूतलमत्तमालां गृहीत्वा सलीलं तद्भुजपाश-

सन्दानितकण्ठग्रहसुखमिवानुभवन्ती दर्शितापूर्वहारलतालीलां कण्ठाभरणलामनयम् ।

इत्थम्भूते च व्यतिकरे छत्रग्राहिणी मानयोचत्—'भर्तृदारिके, स्नाता देवी । प्रत्यासीदति गृहगमनकालः । तत्क्रियतां मज्जनविधिः' इति । अहं तु तेन तस्या वचनेन नवग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छया कथं कथमपि समाकृष्यमाणा तन्तुजालावगुण्ठितामृतपद्ममग्नामिव कपोलपुलकमुकुलजालकलग्नामिव सौभाग्यगुणस्यूतामिवातिकृच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम् । उच्चलितायां च मयि द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किञ्चिदप्रकटितप्रलयकोप इवावादीत्—

'सखे पुण्डरीक, नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यः कश्चित्प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि । कुतस्त्वयापूर्वोऽयमधैन्द्रियोपप्लवो येनास्येव कृतः । क्व ते तद्धैर्यम् । क्वासाविन्द्रियजयः । क्व तेद्दीपित्वं चेतसः । क्व सा प्रशान्तिः । क्व तत्कुलक्रमागतं ब्रह्मचर्यम् । क्व सा सर्वविषयनिरुत्सुकता । क्व ते गुरूपदेशाः । क्व तानि श्रुतानि । क्व ता वैराग्यबुद्धयः । क्व तदुपभोगविद्वेषित्वम् । क्व सा सुखपराङ्मुखता । क्वासौ तपस्यभिनिवेशः । क्व सा सङ्कल्पानुपयंदचिः । क्व तद्यौवनानुशासनम् । सर्वथा निष्फला प्रज्ञा, निर्गुणो धर्मशास्त्राभ्यासः, निरर्थकः संस्कारः, निरुपकारको गुरूपदेशविवेकः, निष्प्रयोजना प्रबुद्धता, निष्कारणं ज्ञानम् । यदत्र भवादृशा अपि रागाभिपङ्कैः कल्पीकि-

यन्ते प्रमादेष्वाभिभूयन्ते । कथं करतलादलितामपहृतामक्षमालामपि न लक्षयसि । अहो विगतचेतनत्वम् । अपहृता नामेयम् । इदमपि तावदपह्रियमाणमनयानार्यया निवार्यतां हृदयम् ।' इत्येवमभिधीयमानश्च तेन किञ्चिदुपजातलज्ज इव प्रत्यवादीत्—'सखे चपिञ्जल, किं मामन्यथा सम्भावयसि । नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिमम् ।' इत्यभिधायालीकरोषाक्रान्तेन प्रयत्नविरचितभीषणभ्रुकुटिभूषणेन मुखेन्दुना मामवदत्—'चपले, प्रदेशादस्मादिमामक्षमालामदत्त्वा पदात्पदमपि न गन्तव्यम्' इति । तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्यैकावलीम् 'भगवन्, गृह्यतामक्षमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम् । उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सलीलजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम् । गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि किमेकाकिन्यस्मि किं परिवृतास्मि किं तूष्णीमस्मि किं जागर्मि किं सुप्तास्मि किं रोदिमि किं न रोदिमि किं दुःखमिदं किं सुखमिदं किमुत्कण्ठेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोऽय किं दिवस एष किं निशेयं कानि रम्याणि कान्यरम्याणीति सर्वं नावागच्छम् । अविज्ञातमदनवृत्तान्ता च क्व गच्छामि किं शृणोमि किं पश्यामि किमालपामि कस्य कथयामि कोऽस्य प्रतीकार इति सर्वं च नाज्ञासिषम् । केवलमाददे कुमारीपुरप्रासादं विसर्ज्य च सलीलजनं द्वारि

निवारितशेषपरिजनप्रवेशा, सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी, तामेव दिशं तत्सनाथतया प्रसाधितामिव कुसुमितामिव महारत्ननिधानाधिष्ठितामिवामृतरससागरपूरप्लावितामिव पूर्णचन्द्रोदयालङ्कृतामिव दर्शनसुमगामीक्षमाणा, तस्माद्दिगन्तरादागच्छन्तमनिलमपि घनकुसुमपरिमलमपि शकुनिध्वनिमपि तद्वार्तां प्रष्टुमीहमाना, तद्वल्लभतया तपःक्लेशायापि स्पृहयन्ती, तत्प्रीत्येव गृहीतमौनव्रता, स्मरजनितपक्षपाता च तत्परिग्रहान्मुनियेषस्याग्राम्यतां तदास्पदतया यौवनस्य चाढ्यतां तच्चूचणसम्पर्कात्पारिजातकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतां तद्रूपसम्पदा कुसुमायुधस्य दुर्जयतामध्यारोपयन्ती, दूरस्थस्यापि कमलिनीव सवितुः सागरवेलेव चन्द्रमसो मयूरीव जलधरस्य तस्यैवाभिमुखी, तथैव तां तद्विरहातुरजीवितोद्दीपनौषधिमिवाङ्गावलीं कण्ठेनोद्वहन्ती, तथैव च तया प्रस्तुततद्दर्शस्यालापयेव कर्णतन्त्र्या पारिजातमञ्जर्या तथैव च तेन तत्करतलस्पर्शसुखजन्मना कदम्बमुकुलकर्णपूरायमाणेन रोमाञ्चजालेन कण्टकितैककपोलफलका निस्पन्दमतिष्ठम् । करतलस्पर्शसुखजन्मना

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सह गता स्नातुमासीत् । सा च पथ्यचिरादिवागत्य तथावस्थितां शनैर्मामवादीत्-भर्तृदारिके, यौ तौ तापसकुमारकौ दिव्याकाराकृतिभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता सुरतवकुसुममञ्जरी स तस्माद्द्वितीयादात्मनो रत्नदर्शनमतिनिभृतपदः कुसुमितलतासन्तान-

गहनांन्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतो भर्तृदारिकामुद्दिश्याभाषीत्-'बालिके, केयं कन्यका कस्य वापत्यं किमभिधाना क्व गच्छति' इति । मयोक्तम्-'एषा खलु भगवतः श्वेतभानोरंशुसम्भूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य सकलगन्धर्वमुकुटमणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं हेमकूटाचलमभिप्रस्थिता ।' इति कथिते च मया किमपि चिन्तयन्मुहूर्तमिव तूष्णीं स्थित्वा विगतनिमेषेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमभ्यर्थितामिव दर्शयन्पुनराह-'बालिके, कल्याणिनी त्वयाविलंबादिव्यचपला बालभावेऽप्याकृतिरियम् । तत्करोपि मे वचनमेकमभ्यर्थ्यमाना' इति ।' ततो मया सविनयमुपरचिताञ्जलिपुटया दर्शितादरमभिहित -'भगवन्, कस्मादेवमभिधत्से । काहम् । महात्मान सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकलमषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति किं पुनराज्ञाम् । तद्विश्रब्धमादिश्यतां कर्तव्यम् । अनुगृह्यतामयं जनः । इत्येवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्या मामभिनन्द्य निकटवर्तिनस्तमालपादपात्पल्लवमादाय निर्पीड्य शिलातले तेन गन्धगजमदसुरभिपरिमलेन रसेनोत्तरीयवस्त्रैकदेशादिपाट्य पट्टिकां स्वहस्तकमलकर्णिकानखशिखरेणाभिलिख्य 'इयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देया' इत्यभिधायार्पितवान् ।' इत्युक्त्वा च सा ताम्बूलभाजनादाकृष्य तामदर्शयत् । अहं तु तेन

तत्सम्बन्धिनालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता
घोषविषयेणापि रोमोद्गमानुमितसर्वाङ्गानुप्रवेशेन मनोवेश
मन्येनाग्रेश्यमाना तस्या करतलादादाय ता घण्टिकापट्टिका
तस्यामिमामभिलिखितामायामपश्यम्—
[illegible] निमसितमोहनालेबुबलनालि[illegible]मोमुक्तालत
'दूर मुक्तालतया विसर्सितया विप्रलोभ्यमानो मे ।
हस इव दर्शिताशा मानसजन्मा त्वया नीत ॥
[illegible]
शेष-अनया च मे दृष्टया, दिङ्मोहभ्रान्त्येव प्रनष्टमनो बहुल
निश्चयेवान्धस्य जिह्वोच्छित्त्येव मूकस्येन्द्रजालेनेव पिच्छुकाये
द्वीपत्वदर्शिनो ज्वरप्रलापप्रवृत्तेरासम्बद्धभाषिणो दुष्टनिद्रयेव
पिशाचग्रहस्य लोकायतिकविषयवाधर्मरुचेर्मदिरयेवोन्मत्तस्य
दुरापेशाविषयस्य पिशाचग्रहस्य दारुणविकारोपचय सुतरा-
मनियत स्मरातुरस्य मे मनस्त । येनाकुलीभि यमाणा
सरिदिव पूरेण विह्वलतामगमम् । ता च द्वितीय दर्शनेन
कुलमहापुण्यामिवानुभूतसुरलोकवासामिव दवतार्धिष्ठिता
मिव लब्धवरामिव पीतामृतामिव समासादित केलाय
राज्याभिषेकामिव मन्यमाना, सततसन्निहितामपि दुर्लभद-
र्शनामिवातिपरिचितामप्यपूर्वामिव सादरमाभाषमाणा, पार्श्वा
वस्थितामपि सर्वलोकस्योपर्यवस्थितामिव पश्यन्ती, कपोल-
योरलकलताभङ्गेषु च सोपग्रह स्पृशन्ती, विपरीतमिव
परिजनस्वामिसम्बन्धमुपदर्शयन्ती, 'तरलिके कथय कथ
स त्वया दृष्ट, कि किमभिहितासि तेन, कियन्त कालमव
स्थितासि तत्र, कियदनुसरन्मसानसावागत' इति पुन पुन

पर्यपृच्छम् । अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव प्रतिपिन्नाग्रेपपरिजनप्रवेशा दिवसमत्यवाहयम् ।

अथ मदीयेनेव हृदयेन कृतरागसविभागे लोहितायति गगनतलोपान्तावलम्बिनि रविबिम्बे, गैरिकगिरिसाललप्रपात-पाटलेषु कमलवनेभ्यः समुत्थाय वनगजयूथेष्विव पुञ्जीभवत्सु भास्करकिरणेषु, मुकुलितरक्तपङ्कजपुटप्रविष्टमधुकरावलिषु, रविविरहमूर्च्छान्धिकारितहृदयास्विव प्रारब्धनिमीलनासु पद्मिनीषु, आसीकृतसामान्यमृणाललतावितरसङ्क्रामितानीव परस्परहृदयान्यादाय विघटमानेषु रथाङ्गनाम्नां युगलेषु, सा क्षुत्रग्राहिणी समागत्याकथयत्—'भर्तृदारिके, तयोर्मुनिकुमार-योरन्यतरो द्वारि तिष्ठति, कथयति चात्मानमुपयाचितुमा-गतोस्मीति ।'

अहं तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशं समुपजातत्वरागमनाशङ्का समाहूयान्यतमं कञ्चुकिनं 'गच्छ, प्रवेश्यताम्' इत्यादिश्य प्राहिणवम् । अथ मुहूर्तादिव तं तस्य, रूपस्येव यौवनं यौवनस्येव मकरकेतनं मकरकेतन-स्येव वसन्तसमयं वसन्तसमयस्येव दक्षिणानिलम्, अनुरूपं सखायमुपेत्यमारकं कपिञ्जलनामानं जराधवलितस्य कञ्चु-किनोऽनुमार्गेण चन्द्रातपस्येव बालातपमागच्छन्तमपश्यम् । अन्तिकमुपगतस्य चास्य पर्याकुलमिव सविषादमिव शून्य-मिवार्यिनमिवान्तर्गताकृतमाकारमललयम् । उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम् । उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावुपमृज्योत्तरीयांशुकपल्ल-

येनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम्। अथ मुहूर्तमिव स्थित्वा किमपि विचिन्त्येव स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरर्पयत्। अहं तु विदिताभिप्राया दृष्टैव 'भगवन्, अत्यतिरिक्तमस्माभिरपराद्धमभिधीयताम्' इत्यवोचम्।

एवमुक्तश्च मया कपिञ्जल अत्यवादीत्—'राजपुत्रि, किं ब्रवीमि। यावेव मे नाभिधेयविषयमवतरति अपरा। क्व कन्दमूलफलाशी शान्तो वनवासनिरतो मुनिजन। क्वायमनुपशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मम। विविधविलाससङ्गतो रागप्राय प्रपञ्च। सर्वमेवानुपपन्नमालोक्य विमारब्धं दैवेन। अयत्नेनैव खलूपहासास्पदतामीश्वरो नयति जनम्। न जाने किमिदं चलकलाना सङ्गत मुताहो जटान समुचितम्। किं तपसाऽनुरूपमाहोस्विद्धर्मोपदेशाङ्गमिदम्। अपूर्वोऽयं विडम्बना। केवलमवश्यकथनीयमिदम्। अपर उपायो न दृश्यते। अन्या प्रतिक्रिया नोपलभ्यते। अन्यच्छरण नालोक्यते। अन्या गतिर्नास्ति। अकथ्यमाने च महाननर्थोपनिपातो जायते। प्राणपरित्यागेनापि रक्षणीया सुहृदस्य इति कथयामि। अस्ति भवत्या समक्षमेव स मया तथा निष्ठुरमुपदर्शितकोपेनाभिहित। तथा चाभिधाय परित्यज्य तस्मात्प्रदेशादुपजातमन्युरुत्थायुसुमावचयोऽन्यं प्रदेशमगमम्। अपयाताया भवत्यां मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति सञ्जातचिन्तं प्रतिनिवृत्य विटपान्तरितविग्रहस्त प्रदेश व्यलोकयम्। यावत्तत्र त नाद्राक्षमा

सीद्य मे मनस्येवम्—'किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन्गतो भवेत्, गतायां च तस्यां लब्धचेतनो लज्जमानो न शक्नोति मे दर्शनपथमुपगन्तुम्, आहोस्विन्कुपितः परित्यज्य मां गतः, उतान्विष्यन्मामेव प्रदेशमन्यमितः समाश्रितः स्यात् ।' इत्येवं विकल्पयन्कञ्चित्कालमतिष्ठम् । तेन तु जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम्—'स कदाचिदैर्यस्खलनविलुप्तः किञ्चिदनिष्टमपि समाचरेत् । न हि किञ्चिन्न क्रियते ह्रिया । तन्न युक्तमेनमेकाकिनं कर्तुम् ।' इत्यवधार्यान्वेष्टुमादरमकरवम् । अन्विष्यंश्च यथायथा नापश्यं तं तथातथा मुहुस्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानस्तल्लतागहनानि चन्दनवीथिका लतामण्डपान्सरःकूलानि च घोलमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरं व्यचरम् ।

अथैकस्मिन्सरःसमीपवर्तिनि निरन्तरतया कुसुममय इव मधुकरमय इव परभृतमय इव मयूरमय इवातिमनोहरे वसन्तजन्मभूमिभूते लतागहने कृतावस्थानम्, उत्कृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव प्रसुप्तमिव योगसमाधिस्थमिव, प्रभातचन्द्रमिव पाण्डुतया परिगृहीतं, निदाघगङ्गाप्रवाहमिव कृशिमानमागतम्, अन्तर्गतानलं चन्दनविटपमिव म्लायन्तम्, अन्यमिवादृष्टपूर्वमिवापरिचितमिव जन्मान्तरमिवोपगतं रूपान्तरेणैव परिणतम्, आविष्टमिव महाभूताधिष्ठितमिव ग्रहगृहीतमिवोन्मत्तमिव परायत्तचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशस्य, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम् ।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजा-
तविषादो वेपमानेन हृदयेनाचिन्तयम्—'एवं नामायमति-
दुर्विषहवेगो मकरकेतुः, येनानेन क्षणेनायमाद्दशमवस्थान्तर-
प्रतीकारमुपनीतः । कथमेषमेकपदे व्यर्थीभवेदेवविधो ज्ञान-
राशिः । अहो बत महाधिग्रम् । तथा नामायमा शैशवाद्धीरप्र-
तिस्खलितवृत्तिर्मम चान्येषा च मुनिकुमारकाणां स्पृहणीयच-
रित आसीत् । अद्य त्वितर इव परिभूय ज्ञानमविगणय्य
तपःप्रभावमुन्मूल्य गाम्भीर्यं मन्मथेन जडीकृतः । सर्वथा
दुलभं यौवनमस्खलितम्' इति । उपसृत्य च तस्मिन्नेव
शिलातलैकपार्श्वं समुपविश्यांसदेशावलम्बपाणिस्तमनुन्मी-
लितलोचनमेव 'सखे पुण्डरीक, कथय किमिदम्' इत्यपृच्छम् ।
अथ सुचिरसंमीलनाल्लग्नमिव कथमपि प्रयत्नेनानवरतरोदन-
वशादुपजातारुणभावमश्रुजलपटलापूरितमुत्कुपितमिव स-
वेदनमिव स्वच्छांशुकान्तरितरक्तकमलवनच्छाय चक्षुरुन्मील्य
मन्थरया दृष्ट्या सुचिरं विलोक्य मामायततरं निश्वस्य
लज्जाविशीर्यमाणविरलाक्षरं 'सखे कपिञ्जल, विदितवृत्तान्तोऽपि
किं मां पृच्छसि' इति कृच्छ्रेण शनैः शनैरवदत् । अहं तु
तदाकर्ण्य तदवस्थयैवाप्रतीकारधिकारोऽयं तथापि सुहृदा
सुहृदसन्मार्गप्रवृत्तो यावच्छक्ति सर्वात्मना निवारणीय इति
मनसावधार्याब्रवम्—'सखे पुण्डरीक, सुविदितमेतन्मम ।
केवलमिदमेव पृच्छामि । यदेतदारब्धं भवता किमिद गुरु-
भिरुपदिष्टम्, उत धर्मशास्त्रेषु पठितम्, उत धर्मार्जनोपायोऽयम्,
उतापरस्तपसां प्रकारः, उत स्वर्गगमनमार्गोऽयम्, उत घतर-

हस्यमिदम्, उत मोहप्राप्तिपुष्किरियम्, आहोस्विदन्यो नियमप्रकारः । कथमेतद्युक्तं भवतो मनसापि चिन्तयितुं किं पुनराख्यातुमीक्षितुं वा । किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे । मूढो हि मदनेनायास्यते । का वा सुखाशा साधुजननिन्दितेष्वेवंविधेषु प्राकृतजनबहुमतेषु विषयेषु भवतः । स खलु धर्मबुद्ध्या विषलतावनं सिञ्चति कुवलयमालेति निस्त्रिंशलतामालिङ्गति कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते रत्नमिति ज्वलन्तमङ्गारमभिस्पृशति मृणालमिति दुष्टवारणदन्तमुसलमुन्मूलयति मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः सुखबुद्धिमारोपयति । अधिगतविपयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि, यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि न नियमयसि वा क्षुभितं मनः । कोऽयमनङ्गो नाम । धैर्यमवलम्ब्य निर्मत्स्यं तामयं दुराचारः ।' इत्येवं वदत एव मे वचनमाक्षिप्य प्रतिपदमान्तरालप्रवृत्तवाष्पवेणिकं प्रमृज्य चक्षु करतलेन पाणौ मामवलम्ब्यावोचत्—'सखे किं बहुनोक्तेन । सर्वथा स्वस्थोऽसि । आशीविषविषवेगविषमाणामेतेषां कुसुमचापसायकानां पतितोऽसि न गोचरे । सुखमुपदिश्यते परस्य । यस्य चेन्द्रियाणि सन्ति मनो वा विद्यते, यः पश्यति वा शृणोति वा श्रुतमवधारयति वा, यो वा शुभमिदं न शुभमिदमिति विवेकुमलम्, स खलूपदेशमर्हति । मम तु सर्वमेवेदमतिदूरापेतम् । अवष्टम्भो ज्ञानं धैर्यं प्रतिसंख्यानमित्यस्तमितैषा कथा । कथमप्येवमेवायत्नविधृतास्तिष्ठु-

न्यसवः । दूरातीत खल्वपदेशकालः । समतिक्रान्तो धैर्यावसरः । गता प्रतिसन्धानवेला । अतीतो ज्ञानावष्टम्भसमयः । केन चान्येनास्मिन्समये भवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणं वा करणीयम् । कस्यान्यस्य वा वचसि मया स्थातव्यम् । को वापरस्त्वत्समो मे जगति बन्धुः । किं करोमि, यत्र शक्नोमि निवारयितुमात्मानम् । इयमनेनैव क्षणेन भवता दृष्टावस्था । तद्भवत इदानीमुपदेशकालः । यावन्म्रियामि तावदस्य फलपान्तोदितप्रादग्दिनकरकिरणातपतीव्रस्य मदनसन्तापस्य प्रतिक्रियां क्रियमाणामिच्छामि । पच्यन्त इव मेऽङ्गानि । उत्कृत्यत इव हृदयम् । प्लुष्यत इव दृष्टिः । ज्वलतीव शरीरम् । अत्र यत्प्रमाणं तत्करोतु भवान् ।' इत्यभिधाय तूष्णीमभवत् ।

एवमुक्तोऽप्यहमेनं प्रावोधयं पुनः पुनः । यदा शास्त्रोपदेशयिद्भः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णं तदाहमचिन्तयम्—'अतिमूर्खमयं गतो न शक्यते निवर्तयितुम् । इदानीं निरर्थकाः खल्वपदेशाः । तत्प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामि ।' इति कृतमतिरुत्थाय गत्वा तस्मात्सरस सरसा मृणालिकाः समुद्धृत्य कमलिनीपलाशानि जललवलान्छितान्यादाय गर्भधूलिकषायपरिमलमनोहराणि च कुमुदकुवलयकमलानि गृहीत्वागत्य तस्मिन्नेव लतागृहशिलातले शयनमस्याकल्पयम् । तत्र च सुखनिषण्णस्य प्रत्यासन्नवर्तिनां चन्दनविटपिनां मृदूनि किसलयानि निष्पीड्य तेन स्वभावसुरभिणा तुषारशिशिरेण रसेन ललाटिकामकल्पयम् । आ चरण-

तलादङ्गचर्चां चारचयम् । अभ्यर्णपादपस्फुटितवल्कल-विरचितेन च करसञ्चूर्णितेन कर्पूररेणुना स्वेदप्रतिक्रि-यामकरवम् । उरोनिहितचन्दनद्रवार्द्रवल्कलस्य स्वल्पस-लिलसीकरनिकरस्राविणा कदलीदलेन व्यजननियामन्वतिष्ठम् । एवं च मुहुर्मुहुरन्यदन्यन्नलिनीदलशयनमुपकल्पयतो मुहु-र्मुहुश्चन्दनचर्चामारचयतो मुहुर्मुहुश्च स्वेदप्रतिक्रियां कुर्वतः कदलीदलेनानवरतं वीजयतः समुदभून्मे मनसि चिन्ता— 'नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः । क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः, क्व च विविधविला-सपरिगन्ध्यमंराजपुत्री महाश्वेता । सर्वथा न हि किञ्चिदस्य दुर्घटं दुष्करमनाचरणीयं वा जगति । दुरुपपादेष्वर्थेव-मवसाया विचरति । नायं केनापि प्रतिकूलयितुं शक्यते । का वा गणना सचेतनेषु, अपगतचेतनान्यपि संवर्तयितुमलं यद्यस्मै रोचते । तत्कुमुदिन्यपि दिनकरकरानुरागिणी भवति, कमलिन्यपि शशिकरद्वेषमुज्झति, निशापि वासरेण सह मिश्रतामेति, ज्योत्स्नाप्यन्धकारमनुवर्तते, छायापि प्रदीपामि-मुखमवनिष्ठते, तडिदपि जलदे स्थिरतां भजति, जरापि यौवनेन सञ्चारिणी भवति । किं वा तस्य दुःसाध्यमपरम्, एवंविधो येनायमगाधगाम्भीर्यसागरस्तृणवल्लघुतामुपनीतः । क्व तत्तपः, क्वेयमवस्था । सर्वथा निष्प्रतीकारेयमापदुपस्थिता । किमिदानीं कर्तव्यम् । किं वा चेष्टितव्यम् । कां दिशं गन्तव्यम् । किं शरणम् । को वोपायः, कः सहायः, कः प्रकारः, का युक्तिः, कः समाश्रयः, येनास्यासवः सन्यायन्ते । केन वा कौशलेन

कतमया वा युक्तया कतरेण वा प्रकारेण केन वावष्टम्भेन कया वा प्रत्यया कतमेन वा समाश्वासनेनायं जीवेत् ।' इत्येते चान्ये च मे विषण्णहृदयस्य सङ्कल्पाः प्रादुरासन् । पुनश्चिन्तयम्- 'किमनया घ्यातया निष्प्रयोजनया चिन्तया । प्राणास्तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः । तेषां च सत्समागममेकमपहाय नास्त्यपरः संरक्षणोपायः । बालभावाद्- प्रगल्भतया च तपोविरुद्धमनुचितमुपहासमिवात्मनो मदनव्य- तिकरं मन्यमानो नियतमेकोच्छ्वासावशेषजीवितोऽपि नायं तस्याः स्वयमभिगमनेन पूरयति मनोरथम् । अकालान्तरक्षमश्चायमस्य मदनविकारः । सततमतिगर्हितेनाकृत्येनापि रक्षणीयान्मन्यन्ते सुहृदस्तत्साधवः । तदतिह्रे पणमकर्तव्यमप्येतदस्माकमवश्य- कर्तव्यतामापतितम् । किं चान्यत्क्रियते । का चान्या गतिः । सर्वथा प्रयामि तस्याः सकाशम् । आवेदयाम्येतामवस्थाम् ।' इति चिन्तयित्वा कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय सञ्जातलज्जो निवारयेदित्यनिवेद्यैव तस्मै तत्प्रदेशात्सव्याजमु- त्थायागतोऽहम् । तदेवमवस्थिते यदप्यावेसरप्राप्तमीदृशस्य चानुरागस्य सदृशमस्मदागमनस्य चानुरूपमात्मनो वा समु- चितं तत्र प्रभवति भवतो ।' इत्यभिधाय किमियं वक्ष्यतीति मन्मुखासक्तदृष्टिस्तूष्णीमासीत् ।

अहन्तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना, सर्वान- न्दानामुपरि वर्तमाना, सर्वमनोरथानामग्रमिवाधिरूढा, सर्वो- त्सवानामतिभूमिमिवाधिशयाना, तत्कालोपजातया लज्जया किञ्चिद्वलन्मध्यमानयवनत्वादस्पृष्टकपोलोदरैर्ग्रथितैरिवोपर्यु परि-

पत्रलतानुबन्धदर्शनलालनैकालम्बनदोषतयापजातप्रथिनम-
दैरलैरानन्दबाष्पजलबिन्दुभिः स्तबद्धिरवेक्षमाणमहर्मुहुश्च
तल्लक्षणचिन्तनम्—द्विष्ठा वावदूयलब्धो मानिव तस्यवृ-
त्तान्तमाह । अल्पान्यमनेन मे सम्भाषणेनापि क्रियताम्यंशेन दाक्षि-
तानुकूलता । यदि च सत्यमेव तस्येदृशी दशा वर्तते ततः
किमिव नोपकृतमनेन, किं वा नोपपादितम्, को वानेनापरः
सनाथो बन्धुः । कथं वा कपिञ्जलस्य स्वप्नेऽपि वितथा भारती
मद्याभ्याहतेरुल्लाघदनाभिज्ञानति । इत्थंभूते किं मयापि प्रति-
पत्तव्यम् । तस्य वा पुरः किमभिधातव्यम् । इत्येवं विचार-
यन्ती पत्र प्रविश्य सलज्जया प्रतीहारपे मालत्यवत्—भर्तृ-
दारिके, त्वत्प्रत्ययगौरवेति परिजनादुपलभ्य महादेवी प्राणा'
इति । तच्छ्रुत्वा कपिञ्जलो महाजनसम्बर्दनाभयः सम्भ्रमो-
त्थाय 'राजपुत्रि, महानयमुपस्थितः कालातिपातो भगवांश्च
भुवनभास्करोऽस्तशिखरमवलम्बते दिवसकरस्तदहं गच्छामि,
सर्वथाभिनवमुक्ताफलादिनिर्गमनयमुपचितोऽञ्जलिरेष मे
परलोकविभवः' इत्यभिधाय प्रतिवचनकालमप्यदत्त्वैव पुरोधा-
यिनाम्नायाः प्रविश्य कनकवेत्रलताकरेण प्रतीहारपुरुषेण क-
म्बुकिलोकेन गृहीतताम्बूलकुसुमपटवासाङ्गरागेण बालरम्भप्रदा-
क्षिणा हस्तकिसलयविलोलनर्तनरक्तकानुगतेन परिजनेन
सर्वतः संकीर्णे द्वारदेशे कथमप्यतिनिर्गमः प्रयत्नैः । अम्बा तु
मन्दमन्दमागत्य मुहूर्तं स्थित्वा स्वभवनमयासीत् । तया तु
तमागत्य किं भूतं किमभिहितं किमाचेष्टितमिति शून्यहृदया
सर्वं नालक्षयत् । गतायां च तस्यामस्तमुपगते भगवति हारी-

तहरिलवाजिनि सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि सवितरि, लोहितायमाने पश्चिमाशामुखे, हरितायमानेषु कमलवनेषु, नीलायमाने पूर्वदिग्भागे, पातालपङ्कक्लुप्तेन महाप्रलयजलधिपयःपूरेणेव तिमिरेणावष्टभ्यमाने जीवलोके, किङ्कर्तव्यतामूढा तामेव तरलिकामपृच्छम्—'अयि तरलिके, कथं न पश्यसि दृढमाकुलं मे हृदयमप्रतिपत्तिविह्वलानि चेन्द्रियाणि । न स्वयमेवापि कर्तव्यमलमस्मि ज्ञातुम् । उपदिशतु मे भवती यदत्र साम्प्रतम् । अयमेव त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः । यदि तावदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवमुच्य विनयमचिन्तयित्वा जनापवादमतिक्रम्य सदाचारमुल्लङ्घ्य शीलमवगणय्य कुलमङ्कीकृत्यायशो रागान्धवृत्तिरनुज्ञाता पित्राननुमोदिता मात्रा स्वयमुपगम्य ग्राह्यामि पाणिमेवं गुरुजनातिक्रमाद्धर्मो महान् । अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्कीकरोम्येवमपि प्रथमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तस्याभयतः कपिञ्जलस्य प्रणयप्रसरभङ्गः, पुनरपरं यदि कदाचित्तस्य जनस्य मत्कृतादाशाभङ्गात्प्राणविपत्तिरुपजायते तदपि सुनिजगर्वजनितं महदेनो भवेत् ।' इत्येवमुच्चारयन्त्यामेव मय्यासन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन वसन्तवनराजिरिव कुसुमरजसा धूसरितां वासवो दिगयासीत्तां शनैःशनैश्चन्द्रदर्शनान्मन्दस्मितायां दशनप्रभेव ज्योत्स्ना निष्पतन्ती निशाया मुखशोभामकरोत् । तदनु रसातलादवनीमवदार्योद्गच्छता शेषफणमण्डलेनेव रजनीकरबिम्बेनाराजत रजनी । क्रमेण

च सकलजीवलोकानन्दकेन समुपारूढरागेण यौवनेनेवारोहता शशिना रमणीयतामनीयत यामिनी । \

अथ तं प्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवाभिनवोद-यरागलोहितं रजनिकरमुदितं विलोक्यान्तर्ज्वलितमदनानलाप्यन्धकारितहृदया तरलिकोत्सङ्गविधृतशरीरापि मन्मथ-हस्तवर्तिनी चन्द्रगतनयनापि मृत्युमालोकयन्ती तत्क्षणम-चिन्तयम्—'एकत्र खलु मदनमधुमासमलयमारुतप्रभृतयः समस्ताः, एकत्र चायं पापकारी चन्द्रहतको न शक्यते सोढुम् । इदमतिदुर्विषहमदनवेदनातुरं च मे हृदयम् । अस्य चोद्गमनमिदं सदाहज्वरग्रस्तस्याङ्गारवर्षः शीतार्तस्य तुषारपातो विषस्फोटमूर्च्छितस्य कृष्णसर्पदंशः ।' इत्येवं चि-चिन्तयन्तीमेव चन्द्रोदयोपनीता कमलवनम्लानिनिद्रेव मूर्च्छा मां निमीलितलोचनामकार्षीत् । अचिरेण च सम्भ्रान्ततर-तरलिकोपनीताभिश्चन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलभ्यसंज्ञा ता-मेवाकुलाकुलां मूर्तेनेवाधिष्ठितां विषादेन मल्लतादविधृतस-वचन्द्रकान्तमणिशलाकामविच्छिन्नबाष्पजलधारान्धकारितमुखीं रुदतीं तरलिकामपश्यम् । उन्मीलितलोचनां च मां सा कृतपादप्रणामा चन्दनपङ्कदिग्धेन करयुगलेन बद्धाञ्जलिरवादीत्—'भर्तृदारिके, किं लज्जया गुरुजनापेक्षया वा । प्रसीद, प्रेषय माम् । आनयामि ते हृदयदयितं जनम् । उत्तिष्ठ स्वयं वा तत्र गम्यताम् । अतः परमसमर्थासि सोढुमिमं प्रबलचन्द्रोदय-विजृम्भमाणोत्कलिकायतमुदधिमिव मकरचिह्नम् ।' इत्येवं-वादिनीं तामवोचम्—'उन्मत्ते, किं मन्मथेन । नन्वयं सर्व-

विकल्पानपह्नरन्सर्वोपायदर्शनान्युत्सारयन्सर्वान्तरायानन्तरय न्सर्वसन्देहानपनयन्सर्वशङ्कालिरस्कुर्वंल्लज्जामुन्मूलयन्स्वयमभि- गमनलाघवदोषमायुरवन्कालानिपातं परिहरन्नागत एव मृत्यो स्तस्यैव या सकाशं मेता कुमुदबान्धवः । तदुत्तिष्ठ यथाकथञ्चि दनुगमनेन जीविता सम्भावयामि हृदयदयितमायासकारिण जनम् ।' इत्यभिदधाना मदनमूर्च्छाखेदविह्वलैरङ्गैः कथञ्चिदव- लम्ब्य तामेवोदतिष्ठम् । उच्चलितायाश्च मे दुर्निमित्तनिवेदकम- स्पन्दत दक्षिणं लोचनम् । उपजातशङ्का चाचिन्तयमिदमपरं किमप्युपस्थितं दैवेनेति ।

अथ नातिदूरोद्गतेन त्रिभुवनप्रासादमङ्गप्रणालानुकारिणा सुधासलिलस्रवानिव बहता चन्द्रनरसनिर्झरनिकरानिव क्षरता श्वेतगङ्गाप्रवाहसहस्राणीव वमता मृतसागरपूरानिवोद्वित्ता चन्द्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनान्तराले, श्वेतद्वीप- निवासमिव सोमलोकदर्शनसुखमिवानुभवति जने, प्रतिभवन- मङ्गभाजनेन विकचकुमुदगन्धैश्चन्दनोदकैरुपह्रियमाणेषु चन्द्रो- दयार्घेषु, प्रतिकुमुदबद्धमधुकरमण्डलासु प्रवृध्यमानासु भवनदीर्घिकाकुमुदिनीषु, शशिमणिमृणालनिर्झरे प्रमोदमुखर- मयूरवरम्ये प्रदोषसमये गृहीतविविधकुसुमताम्बूलाङ्गराग- पटवासचूर्णया तरलिकयानुगम्यमाना तेनैव मूर्च्छानिहितेन किञ्चिदाश्यानचन्दनललाटिकालग्नधूसराकुलालकेन चन्दनरस- चर्चाङ्गरागवेपेणार्द्रेण तथैव च तया कण्ठस्थितयात्तमालया श्रवणशिखरचुम्बिन्या च पारिजातमञ्जर्या पद्मरागरत्नरश्मिनि-

मिलेनेव रक्तांशुकेन कृतशिरोवगुण्ठना केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाणा तस्मात्प्रासादशिखरादवातरम् ।

अवतीर्य च पारिजातकुसुममञ्जरीपरिमलाकृष्टेन रिक्तीकृतो-पवनेन कुमुदवनान्यपहाय धावता मधुकरजालेन नीलपटावगुण्ठनविभ्रमभिव सम्पादयतानुवध्यमाना प्रमदवनपल्लद्वारेण निर्गत्य तत्समीपमुद्यानम् । प्रयान्ती च तरलिकाद्वितीयमपरिजनमात्मानमवलोक्याचिन्तयम् — 'प्रियतमाभिसरणप्रवृत्तस्य जनस्य किमिव कृत्यं वाहेन परिजनेन । नन्वेत एव परिजनलीलामुपदर्शयन्ति । तथा हि । समारोपितशरासनासक्तसायकोऽनुसरति कुसुमायुधः । दूरप्रसारितकरः कर्षति शशी । प्रस्खलनभयात्पदे पदेऽवलम्बते रागः । लज्जां पृष्ठतः कृत्वा पुरः सहेन्द्रियैर्धावति हृदयम् । निश्चयमारोप्य नयत्युत्कण्ठा' इति । प्रकाशं चावदम्—'अयि तरलिके, अपि नाम मामिवायमिन्दुहतकस्तमपि करेण कचग्रहाकृष्टमभिमुखमानयेत् ।' इत्येवंवादिनीं च मां सा विहस्याब्रवीत्—'भर्तृदारिके, मुग्धासि । किमस्य तेन जनेन । अयमात्मनैव तावन्मदनातुर इव भर्तृदारिकापां तात्पराश्चेष्टाः करोति । तथा हि । निर्मलनखलग्नमूर्तिः पादयो पतति । मृणालवलयथवलान्करान्धत्ते । केतकीगर्भकेसरधूलिधूसरपादः कुमुदसरांस्यवगाहते । सलिलसीकरार्द्रांश्चन्द्रमणीन्करैरामृशति । द्वेष्टि विघटितचक्रवाकमिथुनानि कमलवनानि ।' एतैश्चान्यैश्च तत्कालोचितैरलापैस्तया सह तमुद्देशमभ्युपागमम् । तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटाच्चन्द्रोदयमलुतचन्द्रकान्तमणिप्रस्रवणे प्रक्षालयन्ती

यस्मिन्प्रदेशे स आस्ते तस्मिन्नेव सरसः पश्चिमे तटे पुण्डरीकस्येव कर्दमलिप्तमतिव्यक्तमुपलक्षयम् । दक्षिणेदक्षणस्फुरणेन च प्रथममेव मनस्याहितशङ्का तेन सुतरामपदीर्णहृदयेव किमप्यनिष्टमन्तः कथयतेव विषण्णेनान्तरात्मना 'तरलिके, किमिदम्' इति सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम् ।

अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादं 'हा हतोऽस्मि, हा दग्धोऽस्मि, हा वञ्चितोस्मि, हा किमिदमापतितम्, किं वृत्तम्, उत्सन्नोऽस्मि, दुरात्मन्मदन पिशाच पाप निर्घृण, किमिदमकृत्यमनुष्ठितम्, आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते, किमनेन तेऽपकृतम्, आः पाप दुश्चरित चन्द्रचाण्डाल, कृतार्थोऽसीदानीम्, अपगतदाक्षिण्य दक्षिणानिलहतक, पूर्णास्ते मनोरथाः, कृत कर्तव्यम्, वहेदानीं यथेष्टम्, हा भगवन्छुकनासो पुण्यवत्सल न वेत्सि मुपितमात्मानम्, हा धर्म निष्परिग्रहोऽसि, हा तपो निराश्रयमसि, हा सरस्वति विधवासि, हा सत्य अनाथमसि, हा सुरलोक शून्योऽसि, सखे प्रतिपालय मामहमपि भवन्तमनुयास्यामि न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी, कथमपरिचित इवाद्यैवंपूर्वं इवाद्य मामेकपदे उत्सृज्य प्रयासि, कुतस्तवेयमतिनिष्ठुरता, कथय त्वदृते क्व गच्छामि, कं याचे, कं शरणमुपैमि, अन्योऽस्मि सवृत्तः, शून्या मे दिशो जाताः, निरर्थकं जीवितम्, अप्रयोजनं तपः, निःसुखाश्च लोकाः, केन सह परिभ्रमामि, कमालपामि, उत्तिष्ठ देहि मे प्रतिवचनम् क्व तन्ममोपरि

सुहृत्प्रेम क्व सा स्मितपूर्वाभिभाषिता च' इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम् ।

तच्च श्रुत्वा पतितैरिव प्राणैर्दूरादेव सुकैकताराक्रन्दा सरस्तीरलतासक्तिक्षुट्यमानांशुकोत्तरीया यथाशक्ति त्वरितैरज्ञातसमविषमभूमिभागविन्यस्तैः पादप्रक्षेपैः प्रस्खलन्ती पदे पदे केनाप्युत्क्षिप्य नीयमानेव तं प्रदेशं गत्वा सरस्तीरसमीपवर्तिनि शिशिरसीकरासारस्राविणि शशिमणिशिलातले विरचितं कुमुदकुवलयकमलविविधवनकुसुमसुकुमारं कुसुममशरसायकमयमिव शयनमधिशयानम्, अतिनिष्पन्दतया मत्पदशब्दमिवाकर्णयन्तम्, मनःक्षोभभयश्चित्तप्राणायामावस्थितमिव, अतिस्फुरितप्रभेण 'त्वत्कृते ममेयमवस्था' इति कथयन्तमिवाधरेण, 'मत्तः प्रियतरस्त्वयापरो जनो जातः' इति कुपितेनेव जीवितेन परित्यक्तम्, मन्मथव्यथया सहैतानसूनस्वयमिवोत्सृज्य निश्चेतनतासुखमनुभवन्तम्, अविरतरोदनाताम्रेण 'कठिनहृदये, दर्शनमात्रेणापि न पुनरनुगृहीतोऽयमनुगतो जन.' इति सप्रणयं मामुपालभमानमिव चक्षुषा, किञ्चिद्विधृताधरतया जीवितमपहर्तुमन्तः प्रविष्टैरिवेन्दुकिरणैर्निर्गच्छद्दिवसनांशुभिर्धवलितपुरोभागम्, मन्मथव्यथाविघट्टमानहृदयनिहितेन वामेन पाणिना 'प्रसीद प्राणैः, समं प्राणसमे न गन्तव्यम्' इति हृदयस्थितां मामिव धारयन्तम्, इतरेण च नखमयूखदन्तुरतया चन्दनमिव स्रवतोत्तानीकृतेन चन्द्रातपमिव निवारयन्तम्' अन्तिकस्थितेन चाचिरोद्भूतजीवितमार्गमिवोद्वीक्षणेन विलोकयता तपःसुहृदा कमण्डलुना समुपेतम्,

कण्ठाभरणीकृतेन च मृणालवलयेन रजनिकरकिरणपाशेनेव संयम्य लोकान्तरमुपनीयमानम्, कपिञ्जलेन महर्षिनादमाकर्णय-मित्यूर्ध्वहस्तेन द्विगुणीभूतयाप्योढ्मेनाक्रोशता कण्ठे परिष्वक्तं तत्क्षणापक्रान्तजीवितं तमहं पापकारिणी मन्दभाग्या महा-भागमद्राक्षम् ।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा काह-मगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन् क्षणे, किमतिकठिनतयास्य मूढहृदयस्य, किमनेकदु:खसहस्रसहिष्णुतया हृतशरीरकस्य, किं विहिनतया दीर्घशोकस्य, किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य, किं दु:खदाननिपुणतया दग्धदैवस्य, किमेकान्तधामतया दुरात्मनो मन्मथबहुलकस्य, केन हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती । केवलमतिचिराच्छन्नचेतना दु:खभागिनी घना-विव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमप-श्यम् । अथ्रद्धाना चासम्भावनीयं तत्तस्य मरणमात्मनश्च जीवितमुत्थाय 'हा हा किमिदमुपलब्धम्' इति मुक्तार्तनादा, 'हा अम्ब, हा तात, हा सख्य:' इति व्याहरन्ती, 'हा नाथ, जीवित-नियन्धन, आचक्ष्व क्व मामेकाकिनीमशरणामकरुण, विमुच्य यासि, पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था, युगस-हस्रायमाण: कृच्छ्रेण नीतो दिवस:, प्रसीद, सकृदप्यालप, दर्शय भक्तवत्सलताम्, ईक्षस्व विलोकय, पूरय मे मनोरथम्, आर्तास्मि भक्तास्मि अनुरक्तास्मि नाथास्मि बालास्मि अगतिकास्मि दु:खितास्मि अनन्यशरणास्मि मदनपरिभूतास्मि, किमिति म

